❀ श्रीगणेशाय नमः ❀

भगवान् श्री काव्यकंठ वसिष्ठ गणपतिमुनि प्रणीता

षोडशश्लोकी होरानिर्णयसंग्रहः त्रिभावफलचंद्रिका (आंग्लानुवाद)

महाधिद्यादिसूत्र ग्रन्थावलिः

प्रकाशक :

आ. मधुकेश्वर राव

विजय नगरम्

(आंध्र प्रदेश)

Price : Rs. 5/-

500 Copies
1969

Copy Rights :
SRI D. S. VISWAMITRA, B. A., LL. B.
Sirasi North Kanara

Printed by :
SRI PURUSHOTTAM BAGWAI, B. A., LL. B.
At :
Puja Printing Press
Chamouli
Utter Pradesh

Cover Printed At :
GUPTA PRESS
Katrasgarh
(Dhanbad), Bihar.

500–'69

Copy rights :
Sri D. S. Viswamitra B. A. LL.B.
SIRSI–North Kanara.

Copies available with
Puja Printing Press
CHAMOLI
UTTER PRADESH

॥ श्री ॥

। श्री राजराजेश्वरी सन्निधौ प्रार्थना ।

दैवाधीनमिदं जगच्च जगदुः सुज्ञाः जनाः प्राक्तनाः ।
मेने तद्वचनं कदाचन मृषा नैवेति ते किङ्करः ॥
दैवं किं कुरुते जनाश्च ब्रुवते पौरुष्यमेवाधिकम् ।
चेत्सत्यं जनताविपत्तितरणे शक्ता भवेत्सर्वदा ॥१॥

एकस्मिन्समये त्वनन्यशरणो विद्यागुरोर्वाक्यतः ।
त्वत्सेवामधिगम्य दुस्थितिरहं कुर्वं स्त्वदर्चां मुहुः ॥
तीर्त्वा त्वत्कृपयैव दुःखनिवहं त्वामन्वहं चिन्तयन् ।
जानाम्यम्ब सदा तवानुगमनं क्लेशस्य सन्तारकम् ॥२॥

किं कार्यं भवितव्यमस्ति जननि प्राप्तस्य तुर्याश्रमम् ।
सम्प्राप्याखिललोकगर्ह्यं वचनं खिन्नस्य लभ्यं किमु ॥
किन्तु त्वत्कृपयैव वर्धितमहत्ससम्पत्संमृद्धं मठम् ।
दृष्ट्वा तोषमवाप्तुमिच्छति मनः कस्त्वां विना पूरयेत् ॥३॥

क्षेत्रं स्यादयमम्ब छात्रनिलयः श्रीस्वर्णवल्याह्वयः ।
भूयो भूय इहेत्य सर्वजनता सेवान्तवातन्वती ॥
तीर्त्वा त्वाल्कृपयैव दुःख निवहं स्यात्सौख्यभाक्सर्वदा ।
सद्विद्यागुणकर्मधर्मविभवैः राराजमाना सदा ॥४॥

कांक्षां मदीयां महतीं पुनस्तां संजायमानां हृदये मदीये ।
कः पूरयेत्त्वां प्रविहाय देवो हचतो नुगच्छामि विपन्निवृत्यै ॥५॥

श्लोकपंचकमेतत्तु श्री मातुश्चरणाम्बुजे ।
समर्पयति दासोऽयं अनन्यशरणस्तव ॥

—सर्वज्ञेन्द्र सरस्वती स्वामी

श्री श्री पण्डितप्रवरमहाकविवासिष्ठगणपतिमुनीनां-दौहितृ भारद्वाज श्री मधुकेश्वरनामकानां श्रीललिता चरणानन्यभक्तिमतां मठप्रत्यागतानां एतेषां परिचयः अद्यैव संजातः । एभिः सह सम्भाषणेन देवतापरवशं एतेषां हृदयं विदित्वा महान् सन्तोषः समजनि । अथ च एतज्जन संकल्पित गणपतिमुनिविरचित ग्रन्थप्रचारकार्यन्तु पूज्यराजेश्वरीकृपया निर्विघ्नेन प्रचलतु इति आशास्ते अयं श्रीललिताचरणदासः ।

श्री मातुः कृपया त्वदीहितमहद्ग्रन्थप्रकाशोऽखिलः ।
श्री वासिष्ठ महामुनिप्ररचित ग्रन्थैरनेकैर्युतः ॥

भूयात्सर्वजनप्रतोषजनकः तत्कर्मणा तोषितः ।
दीर्घायुः सुचिरं सुखी भय महद्भाग्योदयात्संततम् ॥

स्वर्णवल्ली मठः —सर्वज्ञेन्द्र सरस्वती स्वामी

प्लवङ्ग सं० आश्विन शुक्ल १० गुरुवासरे ।

❀ ॐ नमो भगवते श्री रमणाय ❀

The sacred knowledge and wisdom of ancient sages of Vedic and Prehistoric sacred Bharati; the light of spiritual and metaphysical line of thought is an unbroken current of continuity like Holy Ganga Bhavani. On this great bed-rock of perfection. Mother Nature has constructed the lovely, eternal, Hindu Sanathana Dharma, and Sanskrit language.

The great seers, whose eternal knowledge was, is, and will ever be the guiding light of progressive civilisations, on this lovely planet ; rests greatly on moral, spiritual values ; and never on material superstitious, transistry conceptions. There is great eternal perfection of Truth, within all, as all, in all, as one united life force, the supreme godhead knowledge and bliss absolute. This lovely Truth, Wisdom, Knowledge, Love and Unity was understood, practised, preached and followed, in this Holy land, Bharati, of godmen, woman, and children, from immemorable times. The Immortal breathed his last in the sacred Vedic, Upanishadic Mantras.

The great Rishis, Vasistha, Shakti, Parasara, Bharadwaja, Viswamitra, Madhuschandasa, Gautama, Vamadeva, Kapila. Dattatreya, Daivarata, Vyasa, Suka, Buddha, Sankara, of the past ages ; Sri Ramakrishna. Swami Vivekananda, Sri Ramana Maharishi, Sri Ganapathi Muni Sri Aurovindo, Sri Shivapuri baba. the great spiritual, moral, intellectual luminaries of the modern times have moved in that lovely state of bliss, god-hood, and laid the path for Viswashanti. This is the grace and love, of Adi Shakti "Uma Chandrika" this lovely creation, is blessed by such divine personalities.

They are Veda-Purushas, Sat-Chit-Anand, Para Brahmas. Their sacred life, divine speech, perfect love, grace; embraced all the universe, for joy, peace, unity and blessings.

Bhagwan Sri Kavyakantha Vasistha Ganapathi Muni (1878-1936), the great scholarly desciple of Bhagwan Ramana Maharshi of Arunachala, the Vedapurusha, Sakshat Ganapathi, adorable son of Parvati Parameswara, has graced this planet from Kailas, representing our sacred Hindu, Vedic. Aryan culture; and being an Avatar of Saraswati, enriched the Sanskrit language as never dead but ever bright and perfect, presenting his divine faculties in all branches of learning, Veda, Upanishad, Tantras, Kavyas, Tarka, Mimamsa, Yoga, Ayurveda, Jyotisha, Rajayoga, Kamasastra, as a symbol of Sarvajna. Sage Valmiki is the Adikavi-Sri Kalidasa has created paradise in that line of poetic excellence; Ganapathi Muni perfected with Vedic prosody, as every Sloka of Ganapathi Muni is Veda Mantra.

Bhagvan Sri Ramana and Sri Ganapathi, moved on this earth, as Kartikeya and Ganesh the loving brothrers. Sri Ganapathi Muni's spiritual personality is very little known, except to his preceptor. His life and works are important for the modern thinkers to perceive the depth of spiritual thought, Yogic excellence, poetic perfection in Deva Bhasha.

Sri Ganapathi Muni's works are master pieces in sanskrit, and this work on Jyotisha, Shodasa sloki, Horanirnayasangraha. Tribhavaphala Chandrika, is the essence of Parasariya, Keraleya Samhitas, on Hora sastras, very concise and clear; written for his beloved learned desciples of Gokaran, during 1913, as Laghu-Samhita and later during 1928, rearranged in to three sections.

Sri J. Veerabhadra Sastry. M. A. P. O. L., lecturrer in Sanskrit, Narasaraopeta, Andhra Pradesh, has kindly, translated, this Jyotisha work. in clear and concise. The original text of the poet is strictly followed and there are no omisions or alterations in printing.

Mahavidyadi Sutras, the origin of Dasa Mahavidyas from Rik-Samhita Mantras, is an appealing masterpiece of Tantric literature and the scholars, gladly know, the Dasa Mahavidyas from the Vedic stand point, Mantra, Tantra, Yantra are insepera-

ble, and the presiding deities, are ever existing; leading the aspirant to the path of light, blessings and immortality. Rajayoga Sara Sutras belong to the line of yoga philosophy of Maharishi Patanjali.

Sri J. V. Gopalakrishna Moorty M. Sc., P. hd. (Alld), eminent Sanskrit scholar, has assisted me in this work. With the kindest blessings of Bhagvan Sri Ramana Rishi Sri Ganapathi Muni, His Holiness Sri Sarvgendra Saraswati of Swarnavalli Muth, and my beloved mother and father, Srimati Varahalamma and Sri Venkayya (Daivajna), this sacred work, which will be followed by other works of Sri Ganpathi Muni; to fill the hearts of learned scholars and literary savants of our sacred Bharati, I, a very small person, devoutedly present for their joy, love, understanding and happiness.

Madhukeswara

Kedarkhanda,
Sri Badarikashrama,
Soumya—Sravana Poornima,
Budhavasara
UTTARAKHAND

* ॐ *

नर्वदे हर । पशुपति पंचकम्

कपाली जटाजूटधारी त्रिशूली,
प्रभुः साम्बमूर्तिः शिवश्चन्द्रचूडः ।
हरः कृत्तिवासास्सितो नीलकण्ठः,
पशूनां पतिः पातु नेपालवासी ॥

उमानाथ कैलाशगण्डे नटन्ति,
शिवे गौरिमातः प्रसीदेति वाग्भिः ।
गणालोलरुद्राक्षमाला कलापाः,
पशूनां पतिः पातु नेपालवासी ॥

महाजाह्नवीतीरभागे विभूतौ,
शयानां महान्न्यासरुद्रं पठंतः ।
शिवे ताण्डवालोलरेखा शशाङ्के,
पशूनां पतिः पातु नेपालवासी ॥

चलच्चन्द्रचूडाप्लवद्बालगङ्गा-
लसत्तुंगवीचिप्रवल्गत्कपर्दी ।
महाताण्डवः शोभिताध्मातशंखः,
पशूनां पतिः पातु नेपालवासी ॥

महापापहारी भवानीविहारी,
चलन्नागहारी कलाचन्द्रधारी ।
कलौ घोरपापा द्विमुक्तिं ददाति,
पशूनां पतिः पातु नेपालवासी ॥

—गोपालकृष्ण मूर्ति

DEDICATED

To

The Holy feet

of

Sri NAYANA

Smt VISALAKSAMMA

Madhukeswara

❀ इन्द्रो विश्वस्य राजती ❀

षोडशश्लोकी

प्रायो देहेशितुः सख्युर्दशा शुभफलप्रदा ।
समा समस्य विज्ञेया शत्रोः पापफलप्रदा ॥१॥

Generally if a Planet is a friend to the 1st house lord it becomes auspicious in giving results. Similarly if it is neutral it becomes neutral and if foe, it becomes malicious.

पापाः सपत्नरंध्रांत्य वीर्यलाभस्तनायकाः ।
शुभाश्चतुर्थ वित्ताज्ञा लग्नपुत्र तपोऽधिपाः ॥२॥

The lords of 6th, 8th, 12th, 3rd, 11 and 7th houses are malicious. The lords of 4th, 2nd, 10th, 1st, 5th and 9th houses are auspicious.

राशिद्वयपतीनां चेच्छुभत्वमपि पापता ।
विचारे तारतम्यस्य बलीयान् विषमः समात् ॥३॥

When we have to decide the nature of a planet which becomes the lord of two houses, then its odd lordship is to be taken as more powerful.

यदि राशिद्वयपतेः शुभत्वमपि पापता ।
सूर्यपुत्रस्य पापत्वं शुभत्वादतिरिच्यते ॥४॥

If Saturn becomes auspicious and malicious by two lordships his malicious nature becomes more powerful than the auspicious one.

शुभोऽपि नाधिकं योगी चंद्रो भास्वति पापिनि ।
शुभे पापोऽपि पापो न रविश्चैवं निशाकरे ॥५॥

If Sun is malicious in a radical horescope and Moon is auspicious, the latter does not help much. Similarly if Moon is auspicious and Sun is malicious, the latter does not harm much.

धीधर्माज्ञासुखेशानां बहूना मथवा द्वयोः ।
रंध्रांत्यारिपतीनां च संबंधो योगकारकः ॥६॥

If two or more among the lords of 5th, 9th, 10th and 4th, houses combine with each other the Rajayoga is set up. Similarly Rajayoga is set up by the combination of the lords of 6th, 8th and 12th houses.

कोणयोः सुखराज्येशौ कोणेशौ सुखराज्ययोः ।
स्वर्क्षं विना त्रिकेशानाः स्त्रिकेवा योगकारकाः ॥७॥

The lords of 5th and 9th houses staying in 4th and 10th houses and vice. versa make Rajayoga. If one of the lords of "Trikas" (6th, 8th and 12th houses) stays in the Trikas other than its own house Rajayoga is set up. (Viz ; 6th house lord in 8th or 12th ; 8th house lord in 6th or 12th ; 12th house lord in 6th or 8th places).

शुभानामपि पापानां संबंधश्चेत् परस्परम् ।
पापायोगप्रदास्तत्र नातियोगकराः शुभाः ॥८॥

If lords of auspicious and malicious houses meet together, malicious planets become more useful and auspicious ones become less useful,

त्रिके नीचग्रहाः श्रेष्ठा नीचस्था वा त्रिकाधिपाः ।
चतुष्टये तुंगखेटा स्तुंगस्था वा तदीश्वराः ॥९॥

The debilitated planets in the "Trikas" and vice versa make yoga. Similarly exalted planets in kendras and the lords of kendras exalted make yoga.

त्रिके चतुष्टयेशानाः स्थिताश्चेदल्पयोगदाः ।
विशेषेणाशुभाः पापास्त्रिकेशानाश्चतुष्टये ॥१०॥

The lords of kendras sitting in trikas give less yoga. The malicious lords of trikas sitting in kendras give much adverse results.

द्रविणे वा व्ययाधीशो व्यये वा द्रविणाधिपः ।
परस्परम् वा युक्तौ तौ द्रविणव्ययकारकौ ॥११॥

If the lord of 2nd house sits in the 12the house or vice versa or both combine, they make heavy income and corresponding expenditnre.

मारकौ धनदारेशौ तत्संयुक्तो विशेषतः ।
द्वितीयसप्तमस्थानस्थिता वा पापखेचराः ॥१२॥

The lords of 2nd and 7th houses are maraka planets. The planets in their combination and situated in 2nd and 7th houses are more powerful in doing maraka (Killing).

सर्वेऽपि च दशानाथाः स्वसजातीय भुक्तिषु ।
जातकेभ्यः प्रयच्छंति शुभं वाप्यशुभं फलम् ॥१३॥

The planets in their subperiods under their own periods give results according to their nature.

षष्ठेऽष्टमे दशानाथा द्वादशे वा स्थितो ग्रहः ।
पापी चेदतिपापः स्याच्छुभश्चेन्नातिसौख्यकृत् ॥१४॥

The malicious planet sitting in 6th, or 8th or 12th houses from the house of the main period lord gives very bad results. If such a planet is auspicious by nature it gives less good results·

नैसर्गिक शुभस्वामी संबंधो भावपुष्टिकृत् ।
निसर्गपापसंबंधः कल्पते भावहानये ॥१५॥

The house is strengthened by the situation of naturel auspicious planet. Similarly the house is spoiled by the situation of a malicious planet.

केन्द्रकोणस्थितिर्भावपते र्भावस्य वृद्धये ।
हानये त्रिकवर्तित्वं संबंधे पूर्ववत्फलम् ॥१६॥

A planet sitting in the kendra or kona strengthens its own house. Similarly the situation in Trika weakens its own house. Similar results are seen in the connection of a planet.

सारभूतमिदं यस्तु श्लोकषोडशकं पठेत् ।
मनीषिणां स गोष्ठीषु दैवज्ञः किन्नु मुह्यति ? ॥१७॥

Does be fails in the conferences of the schalars (if he) reads these sixteen slokas the essence (of the Hora sastra) ?. (Never fails).

इति षोडशश्लोकी

होरा निर्णय संग्रहः

॥ प्रथमः सामान्यसंज्ञाध्यायः ॥

कल्याणं कश्चिदस्माकं करोतु ज्योतिषां पतिः ।
यस्य विष्णुवधूसौधकवाटोद्घाटनाः कराः ॥१॥

May the lord of the lights (Sun) whose hands (rays) can open the gates of the palace of the wife of Vishnu cause some good to us.

मतमालोच्य शाक्तस्य महर्षेर्दीर्घदर्शिनः ।
दैवज्ञानां मुदे कुर्मो होरानिर्णयसंग्रहात् ॥२॥

Basing the theory of the great sage of Shakthi, who can fore see things, this, the comprehensive decision of astrology is done for the pleasure of the astrologers.

पूर्णलोकश्च संयोगो ग्राह्यौ संबंधशब्दतः ।
संयोगमात्रे संयोगयोगसंसर्गसंगमाः ॥६॥

When ever the word Sambandha is used in this book, the direct sight and the conjunction of planets should be taken and for the word Samyoga relation (yoga) conjunction (Samsarga) closeness should be taken.

ग्राह्या पादादिदृष्टिश्च दृष्टिवाचकशब्दतः ।
शुभाश्चातिशुभा देवा दैत्याः पापातिपापिनः ॥४॥

The word Dristi means the direct sights according to the pada (=$\frac{1}{4}$) Ardha (=$\frac{1}{2}$) etc, and Deva as Subha, dithya as evil planet.

धीस्तपोजन्मकोणानि प्रतीपंतु तदस्तभम् ।
त्रिकं षष्ठाष्टमांत्यानि शेषो भोग इहोच्यते ॥५॥

Brain (5) Penance (9) Birth (1) are called Konas and the seventh houses of the above are Pratheepams Negatives and sixth. eighth, twelfth are Thriks and the remaining are Bhogas.

दक्षिणाधनषष्टाज्ञाः सव्याः सुखमृतिव्ययाः ।
रमाऽऽख्यौ मातृदशमौ विष्ण्वाख्यौ भाग्यपंचमौ ॥६॥

Second, Sixth. Tenth houses are called Dakshinas. Fourth, Eighth and Twelth are Savyas, Fourth and tenth are Ramas, Fifth and Nineth are Vishnus.

पंचमस्य च रायज्स्य द्वितीयः शत्रुरात्मतः ।
व्ययश्चतुर्थतपसोर्द्वयं लग्नस्य सस्मरम् ॥७॥

The second houses of the fifth and tenth (6, 11) are Sathrus the twelth houses of the fourth and of Penance (9th) of the lagna and the twelvth house and the second and the seventh houses are Sathrus

स्वतंत्रा अयुजो भावाः परतंत्रा युजो मताः ।
कोणभोगाः शुभाः प्रोक्ताः शेषाः पापाः स्वभावतः ॥८॥

All odd numbers are independent and the even are dependants ; Konas (1, 5, 9) Bhogas (2, 4, 10) are auspicious and the others are not so.

निसर्गपदसद्भावे पापाः सूर्यसुतादयः ।
शुभा गुर्वादयश्चेति ज्ञेयं सामान्यशास्त्रतः ॥९॥

The Sun and his son (saturn) etc. are cruel in nature and Guru etc. are auspicious ; this is the general concept in this science.

फलान्यति शुभादीनां दशास्वेव विनिर्दिशेत् ।
कालानपेक्षं वक्तव्यं राजयोगादि जातके ॥१०॥

The good results are to be decided only in the period of good planets, the progress (Rajyoga) etc should be predicted in a horoscope not caring for the time.

श्रीपतेः षड्विधंवीर्यं संज्ञारिष्टे वराहतः ।
फलानि विन्दन्नेतस्माद्दैवज्ञो विजयो भवेत् ॥११॥

The astrologers who calculate the strength of the six kinds according to Sripathi and the Sounja and Rista according to Varah is victorious in this art.

विशिष्ट संज्ञाध्यायः

कोणभोगपतिः कोणत्रिकेदुभोगप्रतीपपः ।
त्रिकप्रतीपपो भौममुख्येष्वति शुभादयः ॥१॥

The lords of kona, Bhoga ; and kona and Thrika ; and Bhoga and Pratheepa ; and Thrika and Pratheepa ; are comparatively auspicious among Kuja and other planets.

अपि स्वभावतः पापं परतंत्रतया त्रिकम् ।
कोणेन बलिना श्लिष्टं भवति क्षीणविक्रमम् ॥२॥

Though, by nature the Thrika is cruel, as influenced by the others if those lords stay in konas the evil effect is lessened.

परतंत्रतया भोगः स्वभावेन शुभोऽपिसन् ।
पापप्रतीपसंश्लेषाद्भवति स्वगुणाच्च्युतः ॥३॥

Thongh the lords of Bhogas are good by nature as they are influenced by the others and if they move with in the houses of papa they lose their qualities.

तनोः सामान्यतो मित्रमपि शत्रुर्विशेषतः ।
द्वितीयोऽतस्तयोरीशो नाम्नाग्र्योऽनन्तरः फले ॥३॥

The lord of the second from lagna house seems generally to be good ; he is a bad one by observation. So he is great in name only and in giving result he is the least.

कोणानि स्वसमीपस्थत्रिकयुंजिशुभानि चेत् ।
नान्वयाद्भावशक्तीनां द्वेषिस्वव्यययोः क्षयात् ॥५॥

Though the lords of konas are benevolent. if they are with the lords of Thrika they can not do good. So if they are in the houses of Thrika they can not do good as they lose power.

भास्वतो दक्षिणा: सव्या: शीतांशो: सव्यदक्षिणा: ।
शुभाशुभाद्वयो: कोणप्रतीपेऽतिशुभाशुभे ॥६॥

All the planets situated right to the sun are called Dakshina.

षष्ठनाथ: सहस्रांशुश्चंद्रो रंध्रान्त्यनायक: ।
लग्ननाथ शुहृत्वेन नपापावित्यत: शुभौ ॥७॥

Even if the Sun were the lord of the sixth house and the Moon as the lord of the eighth and twelvth houses they do not cause harm as the lords of those houses are their friends.

लग्ननाथासुहृत्वेन दौर्बल्यादपि तद्दिशि ।
न शुभावित्यत: पापाविमौ वाहनकर्मपौ ॥८॥

Though the lord of the first house is the friend of the 4th and 10th houses, when he is weak for that part, he cannot do good, so he does bad.

—o—o—o—

अथोदाहरणाध्यायस्तृतीयः

मेषस्य सूर्यो जीवारचंद्राः सोरिसितौ बुधः ।
शनिज्ञौ भार्गवो भानुश्चन्द्रारगुरुवो वृषे ॥१॥

युग्मस्य सौम्यः शुक्रार्की चन्द्रेज्यौ रविभूसुतौ ।
भौमेन्दू जीवभास्वन्तौ शुक्रो ज्ञार्की च कर्किणि ॥२॥

भौमार्कौ गुरुशीतांशू शुक्रसौम्यौ शनिर्हरौ ।
स्त्रियांसितबुधौ मन्दो गुर्वर्काविन्दुभूसुतौ ॥३॥

मन्दोज्ञशुक्रौ चन्द्रारौ सूर्यजीवौ च तौलिनि ।
चन्द्रजीवौ रविकुजौ मन्दः शुक्रबुधावलौ ॥४॥

धनुष्यर्कगुरू भौमचन्द्रौ बुधशनी सितः ।
शुक्रमन्दौ बुधो भौमरवी चन्द्रगुरू मृगे ॥५॥

घटे शुक्रो बुधशनी भौमेन्दुगुरवो रविः ।
कुजेन्दुगुरवः सूर्यः सौम्यः शनिसितौ झषे ॥६॥

The Sun and Jnpiter, Mars, Moon and Saturn, Venus and Mercury for Mesha ; Saturn, Mercury, and Venus and Sun and Moon, Mars. Jupiter for Vrishabha ; Mercury and Venus, Saturn and Moon, Jupiter and Sun, Mars to Midhuna ; Mars, Moon and Jupitar, Sun and Venus and Mercury and Saturn for Kataka ; Mars, Sun and Jupiter, Moon and Venus, Mercury and Saturn for Simha ; Mercury and Venus and Saturn and Jupiter. Sun and Moon, Mars for Kanya ; Saturn and Mercury, Venus and Moon. Mars and Sun, Jupiter for Tula ; Moon and Jupiter and Sun, Mars and Saturn and Venus, Mercury for Vrischika ; Sun, Jupiter

and Mars. Moon and Mercury, Saturn and Venus for Dhanus ; Venus, Saturn and Mercury and Mars, Sun and Moon, Jupiter for Makara ; Venus and Mercury, Saturn and Mars, Moon, Jupiter and Sun for Kumbha ; Mars, Moon, Jupiter and Sun and Mercury and Saturn; Venus for Meena.

द्वादशानामतिशुभाः क्रमादेवं शुभा अपि ।
पापिनश्चातिपापाश्च लग्नानां समुदाहृताः ॥७॥

The very good planets, good planets, bad, very bad are given above for the twelve houses.

शनिशुक्रबुधर्क्षाणा मितरे दैत्यसंज्ञकाः ।
त्रयस्ते चेतरर्क्षाणां दैत्यभिन्ना दिवौकसः ॥८॥

The other houses are called Dythyas for Sani, Sukra and Budha houses, and for the other houses, these three are called Dythyas,

यथापूर्वं बलं ज्ञेयं प्रतियोगं सुपर्वणाम् ।
यथोत्तरं च दैत्यानां तारतम्यविनिर्णये ॥९॥

The Strength of the planets should be knowun to be greater according to the gradation and reverse for bad planets.

—o—o—

अथ संबंधस्थितिविचारणाध्यायश्चतुर्थः

फले तमोग्रहौ स्यातां संबद्धग्रहसंन्निभौ ।
तदभावे समारूढराशिनायक संनिभौ ॥१॥

The two shadow planets give the effect of the planets with which they stay with the effect of the lord in whose house they are.

त्रयाणां पुनराढ्यानां द्वयो रतिशुभादिषु ।
संयोगेष्ववरो योगी श्रेष्ठः स्वावरसंज्ञकः ॥२॥

If among the good planets, two or three come together the good planet cannot do good, with the combination of a bad planet.

श्रीकेशवेशयोर्योगे देवयोर्योगिनावुभौ ।
दैत्यरंध्रांत्यपत्योश्च योगे द्वावपि योगिनौ ॥३॥

If the planets named by Vishnu have conjunction with the divine planets, they do good and the combination of Dythya with the lord of the eighth and twelvth houses also does good.

सर्वेभावाधिपतयः सवर्णगृहसंस्थितेः ।
सवर्णस्य च संयोगात्प्रभविष्यंति योगिनः ॥४॥

All planets, while they are in the houses of similar or equal planets or are with them do good.

सर्वेष्वेतेयुयोगेषु पूर्णालोके परस्परम् ।
बलावरोभवेद्योगी बलाधिकमदूषयन् ॥५॥

In all these ecombinations, planets doing good and having even and direct power and even with the combination of a weak planet also do good.

सर्वेष्वेतेषु योगेषु ज्यायसा पूर्णमीक्षितः ।
तमपश्यन्कनीयांश्च योगोति समुदाहृतः ।।६।।

In all these yogas (doing good) a weak planet seen directly by good planets though this planet does not see it again the yoga is strong.

देवश्री हरिपौ विष्णुदेवश्रोगौ तु योगिनौ ।
देत्यः पद्मालयानाथः शुभो दामोदरस्थितः ।।७।।

If the dinine planet and the Vishnu planets are in the house of Vishnu and Deva they do good. Even if the planet of Laxmi house is Dythya and if he is in the Vishnu house, he does good.

अतिपापातिशुभयोर्योगे पूर्वः शुभो भवेत् ।
अपरो भविता पापः संग्रजाहि गुणागुणाः ।।८।।

In the combination of very good and very bad planets they change their qualities and do good and bad and vice versa.

युक्तः शुभे नातिपापः पापेन च शुभो भवेत् ।
नपातयेच्छुभं नीचैरुच्चैरारोरयेत्परम् ।।९।।

If a very bad planet joins a good or bad planet, it does good only ; the goodness cannot be diminished by the combination of a weak planet but it enhances its power,

त्र्यादीनां भिन्नजातीनां योगे ज्यांयान्पतत्यधः ।
कनीयांच्छुभसंज्ञः स्याद्योगिनो मध्यवर्तिनः ।।१०।।

In the combination of the planets of three categories the weak planet gives good, the good one gives bad and the ordinary one gives moderate yoga (good).

———

अथ पंचमोमारकविचारणाध्यायः

स्वयं लग्नारिपतयः तथा लग्नारिसंस्थिताः ।
लग्नारिपयुता दैत्या मारकाः स्युर्यथोत्तरम् ॥१॥

The lords of the cruel houses and the planets in them and those who join the lords of cruel houses are Marakas (killers) and stronger one by one in the ascending order.

व्ययेशाद्वित्तपस्त मा त्सप्तमेशोऽधिकोऽसुरः ।
एवं स्थितौ च संसर्गे निमित्तबलनिर्णयः ॥२॥

The lord of the Second house is stronger than the lord of 12th house and the lord of 7th house is stronger than he of the 2nd house. Thus the strength of the planets is decided depending on those who are in them and with whom they are.

तत्रस्थितेषु दैत्येषु बली नैसर्गिकः शुभः ।
तेन युक्तेषु दैत्येषु पापो नैसर्गिको बली ॥३॥

If a good planet is with those bad planets the good planet is very strong (to do harm). Thus any bad planet who joins bad planets proves more cruel.

अलाभेहंतृदैत्यस्य देवा मारकलक्षणाः ।
प्रागुक्ततारतम्येन कल्प्यंतां जीवितापहाः ॥४॥

In case the period of Maraka does not come the good planets also according to the strenth described above do harm.

अत्रातिशुभनः श्रेष्टमष्टमेशं प्रचक्षते ।
उपहंताऽऽयुराशित्वात्सहि प्रायेण नायुषः ॥५॥

In this aspect the lord of the eighth house is considered to be more auspicious than the very good planet ; as he is the lord of longivity he does not take away life,

वक्ष्यमाणेन मार्गेण दीर्घमध्याल्पकायुषः ।
निश्चित्यजातकान्पश्चात्कुर्यान्मारक निर्णयम् ॥६॥

The span of life is to be decided on seeing the horoscope into long, middle and short.

—o—o—

अथ षष्ठोदशांतर्दशाध्यायः

श्रीप्रदाः स्वदशाकाले व्ययेशोलाभनायकः ।
भोगेश्वरो विष्णु पतिर्हितत्वे तु यथोत्तरम् ॥१॥

Planets, in their periods give their good effects in this ascending order i. e. lords of twelfth and eleventh houses and then the Bhoga lords (2, 4, 10) and then the Vishnu lords (5. 9).

श्रीहराः स्वदशाकाले विष्णवीशो भोगनायकः ।
अंत्येशायेशरन्ध्रेशा अहितत्वेयथोत्तरम् ॥२॥

For doing bad in their periods the following is the ascending order i.e. lords of Vishuu and then of Bhogas and then lords of 12. 11 and 8th houses.

दशासुदेहसुखदाः षष्ठेशास्तेशवीर्यपाः ।
रंन्ध्रेशो लग्ननाभश्च हितत्वे तु यथोत्तरम् ॥३॥

These planets in ascending order do good for bodies, Sixth, Seventh, third eigth and the first,

दशासु देहकष्टाय लग्नेशः शत्रुनायकः ।
तथा लग्नद्विषां नाथा अहितत्वे यथोत्तरम् ॥४॥

For doing evil, gradually the lords of the first, sixth. twelfth second and seventh are stronger.

अगतौजाः खगोदेयं स्वसजातीय भुक्तिषु ।
फलं दद्याग्दतौजास्तु भिन्नजातीयभुक्तिषु ॥५॥

The divine planet which does not lose its strength gives its good effects in an equal period and that which lose its power gives its good effects in the period of uneven planets.

अगतौजाः फलं खेटो भिन्नजातीय भुक्तिषु ।
मिश्रं दद्याग्दतौजास्तु स्वसजातीयभुक्तिषु ॥६॥

The strong bad planet gives its effects in an uneven planet period and the weak bad planet in the period of equal planets.

पापत्वमोजसोहानिः शुभातिशुभयोरिह ।
शुभत्वमोजसोहानि स्तथापापातिपापयोः ॥७॥

The combination of bad planets destroys the goodness of good planets. for goodness is the harming quality to bad and very bad planets.

दैतेयस्यापिदैतेयो निर्जस्यापि निर्जरः ।
भिन्नजातीयतुल्यः स्याग्दतौजा अगतौजसः ॥८॥

If two evil planets or if two Benefic planets are in combination the less powerful Benefic or Malific will be detrimental and more Malific.

दैतेयस्य सुपर्वा च दैतेयश्च सुपर्वणः ।
स्वसजातीयतुल्यः स्याग्दतौजा अगतौजसः ॥९॥

If a Benefic planet with power is with a evil planet it gains strength if less in strength he will be equally Malific. If an evil planet in strength with a benefic will become benefic.

योगी निमित्तभूतस्य भुक्तौ श्रेयः फलप्रदः ।
योगिमध्यगतत्पक्षदशाश्रेयः फलप्रदः ॥१०॥

The yoga planet gives its good effects through an ordinary good planet. The yoga planet and the ordinary planet with good one and their friends give good effects.

यः शुभो व्यतिरेकेण यः पापो व्यतिरेकतः ।
फलं वदेत्तद्दशयो र्भुक्तिनाथानुसारतः ॥११॥

The good and bad planets by their reverse action give their effects according to the strength of those planets.

फलमिष्टमनिष्टं वा शुभः पापोऽथवा ग्रहः ।
स्वभुक्तौ न दिशेन्नृणां मारकस्तु दिशेत्क्वचित् ॥१२॥

Whether good or bad the planets do not function in their Sub-periods. But the Maraka (Death) planet does it now and then.

आयुर्विचार्य प्रथमं तारतम्यमनंतरम् ।
निर्णीतं मारकं ब्रूयाद्धंतारं दैत्यभुक्तिषु ॥१३॥

First decide the longivity and then its nature. The death planet should be decided among the cruel ones.

निर्धार्य सूक्ष्मया बुध्या तासु चैकांविनिर्दिशेत् ।
आयुर्मानाविरोधेन तारतम्यं विचिंतयन् ॥१४॥

Examining the strength of the planets very minutely, not against the span of life inferred from the planetary position the time of death should be carefully decided.

—o—o—o—

17

अथ सप्तमोभावाध्यायः

अध्याये यत्रयत्रास्मिन्नामनी शुभपापयोः ।
तत्रतत्र निसर्गेणेत्यध्याहार्यं विचक्षणैः ॥१॥

In this chapter where in good and bad is told it is only of their nature (not their lordship).

पत्युः प्रतीपकमला कोणस्वर्क्षोच्चसंस्थितिः ।
संबंधश्चेशशुभयो र्भावस्य फलवृद्धये ॥२॥

The lords of bad places (6, 7, 11) and of Laxmi (4;10) and of Vishnu (1, 5, 9) get their ownership or Uchcha or have influence, that planet is strong.

तारतम्यं प्रतीपादौ मित्रामित्रर्क्षचिंतनात् ।
तेभ्यः स्वर्क्षं ततस्तुंगः संबंधो बलवांस्ततः ॥३॥

The difference between bad and Mitra and Amitra should be discussed first. Among them. the owner of the house and the Uchcha planet and that which joins the above are stronger one after another.

भावस्य भावनेतुर्वा संबंधः पापखेचरैः ।
त्रिकनीचस्थितेशस्य भावस्य बलहानये ॥४॥

The combination of cruel planets which are the lords of the houses and the Neecha the neecha and ill planet in Trika are considered baneful to Bhava.

सामान्यरीत्या भावानामेवं प्रोक्तं बलाबलम् ।
आयुषो निर्णयं वक्ष्ये विद्वत्प्रीत्ये विशेषतः ॥५॥

Though the strength of Bhavas is told thus generally for the satisfaction of well-versed people the longivity is specially discussed here.

लग्नरंध्राशशांकानां बलेनायुर्विचिंतयेत् ।
त्रिष्वायुरबलेष्वल्पं मध्याल्पं हीनयोर्द्वयोः ॥६॥

The longivity should be considered by the strenghth of Lagna and Raudhra (1, 8) and Moon. If all are weak it is short and if two are weak it is moderately weak.

उभयोर्बलिनोः शेषे हीने स्यान्मध्यदीर्घकम् ।
शेषेत्वहीनेदीर्घाल्पं सर्वेषां परमं बले ॥७॥

If two are strong and one weak it is midway long. If the third one is moderate, if all are strong it is long.

लग्नायुः कर्मनाथानां चिंत्यमायुर्बलेन च ।
ग्रहाणां तत्तदुचितस्थानस्थित्या च चिंत्यताम् ॥८॥

Through the strength of Lagna, Eighth, Moon longivity should be considered; the planets in respective places for giving longivity are to be considered.

यथैवलग्नाद्भावानां सर्वेषामन्ववेक्षणम् ।
तथा भवति चंद्राच्च सूर्याच्चेत्यपरे जगुः ॥९॥

Some consider the Bhavas (aspects) through Moon just like those from lagna and others from the Sun.

——

अथाष्टमो योगाध्यायः

अरंध्रायाश्लेषदोषौ धर्मकर्माधिनायकौ ।
राजयोगकरौ स्यातां संबंधात् परिवर्तनात् ॥१॥

The 9the and 10th house lords give Rajoyoga by combination or exchanging their places if they are not connected withc 8th and 11th house lords.

लग्नेशयोगदृष्टिभ्यां योगोऽयं प्रबलोभवेत् ।
रंध्रेश्वरस्य दैत्यस्य भवेद्योगेन दुर्बलः ॥२॥

The above told Rajayoga becomes more powerful by the 1st house lord's combination. If the 8th house lord comes there the Rajayoga becomes weak.

अषष्ठायाश्लेषदोषौ बुद्धिकर्माधिनायकौ ।
राजयोगकरौ स्यातां संबंधात् परिवर्तनात् ॥३॥

Similiarly the 5th and 10th bouse lords give Rajayoga if they are not connected with 6th and 11th house lords.

अयं च योगो लग्नेशदृग्योगाभ्यां बली भवेत् ।
षष्ठेश्वरस्य दैत्यस्य भवेद्योगेन दुर्बलः ॥४॥

This Rajayoga becomes more powerful by 1st house lord's combination and weakeng by 6th house lords combination.

अव्ययेशाश्लेषदोषौ लग्नकर्माधिनायकौ ।
राजयोगकरौ प्राग्वत् संबंधात् परिवर्तनात् ॥५॥

Similarly the 1st and 10th house lords make Rajayoga if they are not contaminated by 12th & 11th house lords.

विष्ण्वोशयोगदृष्टिभ्यां योगोऽयं प्रबलो भवेत् ।
व्ययेश्वरस्य दैत्यस्य भवेद्योगेन दुर्बलः ॥६॥

The above Rajayoga will be strengthened by 5th and 9th house lords. If the 12th house lord sangvishes there it will be reduced.

राजयोगपरश्चंद्रो यदि सर्वग्रहेक्षितः ।
सर्वग्रहेक्षितं राज्यं यदि योगोऽन्य उच्यते ॥७॥

If moon is aspected by all the planets a Rajayoga, will happen. Similarly if all the planets see the 10th house another kind of Rajayoga, it is called.

विद्यते यस्य भावस्य सर्वग्रहविलोकनम् ।
योगस्तद्भावसंबंधी भवेत्कश्चिदनुत्तमः ॥८॥

If all the planets see any house that house (Bhava) gets some kind of Rajayoga powerful to certain extent.

सर्वै नैसर्गिकशुभैस्त्रिषडा यास्पदस्थितैः ।
योगः सूपचयो नाम धनवृद्धिकरो नृणाम् ॥९॥

If all the natural auspicious planets are sitting in 3rd, 6th & 11th hoses, a Rajayoga namely "Supachaya" occures.

चंद्रतश्चेदयं योगो बुद्धिवृद्धिकरो भवेत् ।
धने व्यये चोभयत्र श्रीयोगो मंगलादिभिः ॥१०॥

If this "Supachaya" happens from Moon it results in the progress of intiligence. If the five planets (Mars, Mercury, Jupi-

ter, Venus & Saturn) are situated in 2nd & 11th houses "Sriyoga" happens.

योगः केमुद्रिमो नाम ग्रहाभावे प्रकीर्तितः ।
केन्द्रस्थिते संग्रहे वा चंद्रेनायमितिस्थितिः ॥११॥

If the planets are absent in the adjoining houses then "Kemudruma" yoga (poverty) happens, However it does not occur, if the Moon is situated in a kendra or in contamination of other planets.

पुनश्चंद्रात्सपत्नास्तरंध्रस्थैरखिलैः शुभैः ।
नैसर्गिकै र्भवे च्छ्रेयानधियोगोऽधिकारदः ॥१२॥

If all the auspicious planets are situated in 6th. 7th and 8th houses from Moon, it is called Adhiyaga which gives power and position.

त्र्यादिभिस्तुंगगैः खेटैः स्वर्क्षस्थैश्चतुरादिभिः ।
पंचादिभिश्च संयुक्तैर्योगा ऐश्वर्यदायकाः ॥१३॥

If three or more than three planets are exalted, or if four planets are in their own houses or if five or more than five planets are combined ; such yogas are auspicious.

इति सामान्यतः प्रोक्तं शास्त्रं गंभीरमुज्वलम् ।
उपदेशाय शिष्याणां गोकर्णे विलसद्धियाम् ॥१४॥

Like this the general aspects of this deep Science (Astrology) are spoken for the students residing in Gokarna.

इति होरानिर्णयसंग्रहः समाप्तः

त्रिभावफल चंद्रिका

प्रथमो मयूखः

सवितारं नमस्कृत्य सर्वखेचरनायकम् ।
केरलीयस्य शास्त्रस्य सारः संगृह्यते मया ॥१॥

Saluting the Sun, lord of all the planets. I abridge the essence of kerala seience.

आयुःकलत्रपुत्राणां क्रियतेऽत्र विचारणम् ।
विबुधैरितरे भावा बोध्याः सामान्यशास्त्रतः ॥२॥

The discussion pertaining to the longivity, wife and children is done here. By learned people the other aspects should be known through ordnary science.

सद्योऽरिष्टमरिष्टं च हीनं मध्यं च दीर्घकम् ।
अमितं चेति षोडाऽयुर्हीनादित्रितये दशाः ॥३॥

Immediate death, very short life, short life moderate life, long life, very long life thus longivity is of six kinds, and it is of three kinds also short, middle and long.

सद्योऽरिष्टेप्यरिष्टे चाप्यमिते च तथाऽऽयुषि ।
मारकस्यानपेक्ष्यैव दशां जीवितनिर्णयः ॥४॥

Not taking into consideration the death planet, the immediate death, death, and the longivity the planets can decide death.

सद्योऽरिष्टारिष्टयोगान्वराहमिहिरोऽभणत् ।
अमितं सिद्धिसापेक्षमन्यत्रायमिहोच्यते ॥५॥

Varahamihira described immediat death and death. That long life depends upon the position of the planets (but not by their nature) will be discussed here.

विलग्नजन्मराशीशौ पती तद्रन्ध्रयोरपि ।
शत्रू समौ वयस्यौ चेदल्पमध्यचिरायुषः ॥६॥

If the lords of the eighth house and of lagna and that house where the Moon stay, are eremies to the lords of Lagna and the moon, staying house it is a short life and if they are Sama (equal) it is of middle type and if they are friendds it is long.

लग्नेशो रश्मिमाली च लग्नरन्ध्रांशपावपि ।
शत्रू समौ वयस्यौ चेदल्पमध्यचिरायुषः ॥७॥

If the lord of Lagna and the Sun are enemies to the lords of Amsa of lagna and of eighth house, the life is short and if equals it is middle and if they are friends, it is long.

बलवत्त्वं विलग्नेन्द्वोः संबन्धो द्विविधः शुभैः ।
लग्नजन्मेशयोर्वीर्यं तयोरेकादशस्थता ॥८॥

The influence of the planets having goodness of the two kinds, the stay in the eleventh house gives strength to the lords of lagna and to him of the Moon's stay.

तयोः केन्द्रे संस्थितिश्च त्रिषडा येष्वसद्ग्रहाः ।
द्वितीयरन्ध्रकेन्द्रेषु कोणेषु च शुभस्थितिः ॥९॥

The stay of the above two planets in kendras and the bad planets in the 3. 6, 11 houses. the good planets staying in 2, 8 and kendra, kona.

अमौढ्यश्च गिरां भर्तुरायुर्दैर्घ्यं करा गुणाः ।
दुर्बलत्वं विलग्नेन्द्वोः पापदृष्टिसमागमौ ॥१०॥

The Jupiter not being in Mudha, all these things count the longivity; and if the Lagna and Moon are having wicked influence of bad planets or their stay in bad houses life is shortened.

लग्नजन्मेशयोर्मौढ्यं स्थितिर्नीचव्ययारिषु ।
केन्द्रत्रिकोणरन्ध्रेषु पापखेचरसंस्थितिः ॥११॥

The setting (Mudha) of the lords of Lagna and the Moon or weak or stay in 12, 6, house and stay of bad planets in Kendra Kona,

ग्रहेक्षितस्यामृतांशोः शत्रावायुषि वा स्थितिः ।
सुभानां वा त्रिभिः पापैर्दृष्टानामष्टमे स्थितिः ॥१२॥

The stay of the Moon in the bad places (Saturn) or stay in the stay of a good planet seen by three bad planets.

राशिसंधिषु चोत्पत्तिरायुर्हानिकरा नृणाम् ।
संकीर्णत्वे तु योगानां मध्यमायुर्विनिर्दिशेत् ॥१३॥

The brith in the middle of two houses all these make the longivity diminish ; the combination of both the kinds make the middle kind of longer life.

दीर्घं मध्यमथाल्पं वा योग निश्चित्य बुद्धिमान् ।
तत्रायुरन्तरे ब्रूयाद्दशायां हन्तुरापदम् ॥१४॥

The intelligent should decide the short. the middle and long life. The death planet gives death in its sub-period (Anthardasa).

चंद्रादष्टमराशीशः क्रूरद्रेक्काणपः शनिः ।
रन्ध्रगौ लग्नचंद्राभ्यां रन्ध्रस्यापिविलोककौ ॥१५॥

The lord of the eighth house of the Moon and that of the Saturn being the lord of bad Drekkana are in 8th house or they see the eighth house of Lagna or of the Moon stay.

गुलिकेशश्च राहुश्च मारकाः परिकीर्तिताः ।
तेषु यो दुर्बले दुष्टे भावे स्यात्त विनिर्दिशेत् ॥१६॥

Gulika and Rahu are said to be marakas. Death planets among these whichever is weak and whoever is in bad place, is the death planet (Maraka).

दशा वान्तर्दशा वाऽपि तस्य मृत्युप्रदा भवेत् ।
मारकश्चेच्छुभाधीशस्तस्मादन्य विनिर्दिशेत् ॥१७॥

The period or subperiod causes death. If the death planet is a good one that is potsponed to another planet,

देहे जीवे च पापस्य योगः स्यान्मरणप्रदः ।
शुभसंबन्धहीनत्वे देहजीवदशागमे ॥१८॥

If the Jupiter is in the first house (body) and has th combination of bad planets and not having the influence of bad planets Jupiters period may do harm to life.

जन्मराश्यन्वयेष्वार्के रल्पमध्यचिरायुषाम् ।
क्रमाद्विनिर्दिशेन्नृणां मरणग्रहचारतः ॥१९॥

The movment of Saturn according to its daily course near the Lagna (i.e. 1, 2. 12) the short, middle and the long life is decided.

मंदरन्ध्रेशयोरंशाद्राशेर्वार्कौ त्रिकोणगे ।
अर्कारूढगृहस्यार्थरिष्फयोर्वा त्रिकोणगे ॥२०॥

When the Sun moves in the konas (1, 5, 9) of the Saturn stay or of the lord of 8th house or when the Sun moves in 2, 12; 5, 9 to his stay at the time of brith.

अंशलग्नाधिपाक्रांतराशेर्जीवे त्रिकोणगे ।
कालहोराधिपाक्रांतराशेर्वा मरणं नृणाम् ॥२१॥

If the Jupiter moves in Konas (1, 5, 9) of the Saturn of the lord of Amsa or Kala Hora death is indicated.

यो राशिः सूर्यजाक्रांत स्तद्धनस्यव्ययस्यवा ।
कोणे चरति वागीशे मरणं प्रवदेन्नृणाम ॥२२॥

That house in which there is Saturn, if the Jupiter moves in the second or 12th house or moves in the Konas causes death.

राशेर्मंदाधिरूढस्य तृतीयायात्मजारिषु ।
दृष्टिमान्मृतिदो जीवो यत्रक्वचन संचरन् ॥२३॥

The Jupiter causes death, if he moves in one of the 3, 11, 5, 6th houses to the house where Saturn stays or seen or influenced by him (Jupiter),

अष्टमेशाश्रितं राशिमावसत्यहिमत्विषि ।
जन्मतारां विलग्नस्थतारकां वा मृतिर्भवेत् ॥२४॥

If the Sun comes to the place where the lord of the 8th house stays, the birth-star or the house-star may cause death.

स्वांशाद्रंध्रेश्वरांशाच्च लग्नेशांशाच्चरादिषु ।
स्थितो जन्मनि तिग्मांशुश्चरन्कोणे मृतिप्रदः ॥२५॥

If the Sun comes to Kona (1, 5, 9) staying in the Lagana itself at the brith time either of his own or of 8th house of Amsa.

सूर्याश्रितर्क्षगे चंद्रे रंध्रेशाधिष्ठितोडुगे ।
जन्मराशेस्त्रिकोणे वा निर्दिष्टं मरणं नृणाम् ॥२६॥

If the moon comes to the Sun's stay or he comes to the stay of the lord of the eighth house or he comes to the brith house or to its Konas, death is indicated.

धनेशाश्रित राशेर्वा तत्सप्तमगृहस्य वा ।
त्रिकोणस्थे धनेशांशचरे वा शीतगे मृतिः ॥२७॥

If the Moon moves in the Konas of the stay of the lord of second house or to the 7the house of him or in the Amsa house of the lord of the 2nd house death occures.

निज जन्मनि यस्मिन्भे गुलिकस्तद्गते विधौ ।
रोगारम्भस्तदस्तर्क्षे मरणं दृढमादिशेत् ॥२८॥

If death begins if the Moon moves in the houses where gulica stays at the time of brith, and his movement in the Seventh house of this gives death without fail.

मंदजीवार्कचंद्राणां प्रोक्तेष्वेतेषु राशिषु ।
मृतिमष्टकवर्गेण हीने राशौ समादिशेत् ॥२९॥

Among Saturn, Jupiter, Sun, and the moon, in whose house the Astaka varga points are less and if that planet moves in that particular house death is indicated.

विलग्नादष्टमे लग्ने रंध्रेशाश्रितभेऽपि वा ।
लग्नेशराश्यंशकयोर्मृतिलग्नेऽथ वा मृतिः ॥३०॥

In the eighth house of the birth Lagna or in the house where the lord of eighth house stays or in the house of the lord of Lagna or of Amsa death takes place.

—o—o—

द्वितीयो मयूखः

अस्ततन्नाथतद्द्रष्टृतद्युक्तभृगुजादयः ।
साधनानि कलत्रस्य बलाबलनिरूपणे ॥१॥

The strengh and the weakness of the wifes house should be considered from the seventh house, its lord; the influencing plnnet he who stays there and the venus etc.

शुक्रास्तनाथतत्स्थानां सर्वेषामिह यो बली ।
भार्यायाः संभवन्तीह तस्य वर्णादयो गुणाः ॥२॥

From the qualities of Sukra; the lord of the 7th house and the planets in that house colour and the other qualities of the wife are calculated according to the relative strength of the planets.

नवमे शुक्रसंयुक्ते कलत्रेशे बलान्विते ।
धर्मशीला भवेद्भार्या सपुत्रा भाग्यवत्यपि ॥३॥

If the venus is in the 9th house and if the lord of 7th house is strong. the wife is dutiful, good natured, having children and wealth.

पंचमे सप्तमे लाभे नवमे वा शुभग्रहाः ।
कलत्रभावतः प्रोक्तास्तद्भावबलहेतवः ॥४॥

If the three are good planets either in the fifth or seventh or eleventh or ninth house, begining from the seventh house the strengh of that house is considered.

दारेशे शुभसंयुक्ते शुभखेचरवीक्षिते ।
शुक्रे वा दारभावस्थे भवेद्भार्या पतिव्रता ॥५॥

If the lord of thə 7th house is with good planets or seen by good planets or if the Venus is in the 7th house the wife is chaste.

भार्यावियोगो मर्त्यानां सप्तमस्थे धरासुते ।
चन्द्रमात्रेक्षितयुते निश्चयेन वधूमृतिः ॥६॥

If the Mars is in the 7th house the death of wife for men is indicated and if only the Moon sees or is with him, the death of the wife is certain.

नक्रस्थः सप्तमे जीवः कीटस्थः सप्तमे सितः ।
वृषस्थः सप्तमे चांन्द्रिः शुभा अप्यशुभाः फले ॥७॥

If the sevnth house is copricorn and there is Jupiter in it or the seventh house being seorpio and Venus in it, and if Vrishbba is seventh house and Mercury is in it, they do harm even though thay are good.

रन्ध्रेशः पंचमेशो वा भवेद्यदि कलत्रगः ।
हन्यात्कलत्रं जातानामिति केरलनिर्णयः ॥८॥

It is told that the position of the lord of the eighth house or of the fifth house in the seventh kills the wife of the individnal.

चरराशिगतः शुक्रः पापमध्यगतो यदि ।
युक्तो मंदेन दृष्टो वा नाशं यास्यति भामिनी ॥९॥

If the Venus is in the movable houses and if he is in the middle of bad planets and if he is with the combination of Saturn or influneed by him, the wife will die.

कलत्रे वा कुटुंबे वा पाद्दग्योगसंभवे ।
तदीशे बलहीने तु कलत्रांतरमादिशेत् ॥१०॥

If even in 7th house or in 2nd house bad planets influence or combination happens the lord of that house 7th causes two marriages.

सप्तमे वाऽष्टमे पापे व्यये भूसुनूना युते ।
अदृष्टे यदि नाथेन कलत्रांतरमादिशेत् ॥११॥

If a bad planet is in the 7th or in 8th house and the Mars in the 12th unseen by the lord of that house second marriage is indi cated.

दारेशस्थनवांशेशे नीचमूढारिभांशगे ।
पापमध्ये पापदृष्टे कलत्रांतरमादिशेत् ॥१२॥

If the lord of the Navamsa where the lord of the wifes house stays is having Neecha (weak) setting (Mudha) disadvatageous (Ari) Amsa (Degree) or among the bad planets or seen by bad planets the second marriage is indicated.

वित्ते पापबहुत्वे तु कलत्रे वा तथाविधे ।
तदीशे पापदृष्टे तु कलत्रत्रयमादिशेत् ॥१३॥

If there are bad planets in Dhana (2nd house) or in 7th or the lord is seen by bad planets three marriages are indicated.

कलत्रलाभनाथौ द्वौ परस्परनिरीक्षितौ ।
बलाढ्यौ वा त्रिकोणस्थौ बहुदारयुतौ भवेत् ॥१४॥

The lord of the wifes house and of the 11th are seeing each

other, having strength and stay in (1, 5, 9) many wives are indicated.

अस्ततन्नाथ शुक्राद्यैर्यथादारनिरूपणम् ।
पुंसां तथैव नारीणां कर्तव्यं भर्तृचिंतनम् ॥१५॥

By considering the 7th house and its lord and Venus etc the nature of the wife is to be decided the same is to be decided for men and woman as said above.

नाथस्य हानिर्नारीणां राहौ भौमेऽथवाऽष्टमे ।
पापैरालोकितस्तद्वदष्टमस्थः शनैश्चरः ॥१६॥

If Rahu ar Mars is in 8th house or seen by bad planets as above· or Saturn in the 8th house cause the loss of wife to man.

शुक्रोवा सप्तमेशो वा बलवान्केन्द्रगोऽपि वा ।
लग्ननाथेन युक्तो वा बाल्ये परिणयो भवेत् ॥१७॥

If Venus or the lord of the seventh house is strong or in kendra or with the lord of Lagna the marriage takes place earlier.

तौ चेदुपचयस्थाने विवाहे धनलाभदौ ।
लग्नेशादस्तपो दूरे दूरे पाणिग्रहो भवेत् ॥१८॥

If the above two are in Upachayas (3, 6, 10, 11)the marriage is profitable ; If the lord of seventh house is distant from the lord of Lagna the marriage is late.

जामित्रे तत्पतिस्थाने तयोः सप्तमभेऽपिवा ।
तयोः कोणेऽथवा जीवाद्यूने कोणेऽथ वा पुनः ॥१९॥

If a strong planet moves in the seventh house or in that house where the seventh house lord stays or in the seventh of the two konas.

शुक्रलग्नास्त जन्मेशां सवीर्यं चरति ग्रहे ।
नारीणामथवा पुंसां विवाहस्तु भविष्यति ॥२०॥

Or in the 7th, 5th 9th houses or in the Lagna with Venus or in the seventh house the marriage takes place either to man or to woman.

—o—o—o—

तृतीयो मयूखः

पुत्रस्थानगते शीतरश्मौ पूर्णबलान्विते ।
दृष्टे वा देवगुरुणा पुत्रावाप्तिर्न संशयः ॥१॥

If the strong moon is in the 5th house and seen by the Jupiter, there is no doubt of Male issue.

लग्नपुत्राधिपौ केन्द्रे शुभग्रहसमन्वितौ ।
कुटुंबेशे बलाढ्ये च पुत्रावाप्ति विनिर्दिशेत् ॥२॥

If the lords of Lagna and of the fifth house are in kendra with the combination of good planets and if the lord of (Kutumba) Family,2nd house is strong the children are certain to be born.

पुत्रेश्वरांशराशीशे शुभे वा शुभसंयुते ।
शुभेन वीक्षिते वापि पुत्रावाप्ति विनिर्दिशेत् ॥३॥

The lord of the house of the stay of the lord of the 5h house is good or with good planets or seen by good planets the certainty of children is decided.

स्वक्षेत्रसिंहमीनस्थः पुत्रस्थानगतः कुजः ।
दृष्टश्चेद्देवगुरुणा पुत्रावाप्ति विनिर्दिशेत् ॥४॥

If the Mars is in his own house or Simha or Meena or in the 5th house or seen by the Jupiter issue is sure.

युक्तौ लग्नसुताधीशौ वीक्षितौ वा परस्परम् ।
परिवर्तनमाप्तौ वा पुत्रयोगास्त्रयः शुभाः ॥५॥

If the lords of Lagna and the fifth house are seeing each other or are in one house or stay in their mutual houses these three aspects are good for begetting children.

पुत्रेशांशपतौ लग्ने लग्नेशांशपतौ सुते ।
जीवस्वांशपतौ केन्द्रे पुत्राप्ति मुनयो विदुः ॥६॥

If the lord of Amsa of the 5th house is in Lagna and the lord of Amsa of the birth lagna is in the 5th house and if the Amsa lord of the house of Jupiter is in kendra the aspect of children is strong and it is known by sages.

गर्भाधानसमर्थत्वं सूर्याद्रेतश्च भार्गवात् ।
ओजराश्यंशगौ तौ चेत्पुंसां पुत्राप्तिरिष्यते ॥७॥

The capacity for mating is from the sun and creation of sperm is from Venus if the two are in ojo i.e, in odd houses on the horoscope of men they will be blessed with children.

गर्भधारणसामर्थ्यं चंद्राद्रक्तगुणः कुजात् ।
समराश्यंशगौ तौ चेत्पुत्रलाभस्तु योषिताम् ॥८॥

The formation of pregnancy is from the Moon and the quality blood is from the Mars, if these two are in even houses on the horoscope of woman, the children are to be predicted.

सूर्यशुक्रौ गुरुयुतौ पुंसो बीजस्फुटं भवेत् ।
चंद्रभौमो गुरुयुतौ स्त्रीणां क्षेत्रस्फुटं भवेत् ॥९॥

If the Sun and the Venus are with the Jupiter the seed for germination is seen in men. If the Moon and Mars are with the Jupiter the womb of a woman is developed.

ओजोराश्यंशगं बीजं क्षेत्रं तु समभांशगम् ।
द्वयात्पुत्रे शुभयुतिः सन्तत्यै नरयोषिताम् ॥१०॥

If the seed is in odd houses and the formation of wonb is in even houses and the fifth house these two are seen by good planets the childrn are indicated for men and woman.

क्लीबैः पापैश्च संबद्धं बीजं वा क्षेत्रमेव वा ।
सन्ततिप्रतिबन्धाय नराणामपि योषिताम् ॥११॥

If the house of seed or womb are occupied by impotent planets (Saturn and Mercury) or by bad planets it is the obstacle for children in both the cases of men and women.

जन्मपुत्रास्तलग्नेशां जीवस्य च बलाबलात् ।
सामान्यशास्त्रविज्ञेयात्सन्ततेस्तु बलाबलम् ॥१२॥

The strength of children is generally decided by the strength of the Jupiter and the lords of 1, 5, 7th houses.

ओजराश्यंरागाः पुत्रनाथजीवार्कभूमिजाः ।
अपत्ययोगिनां कुर्युर्वृद्धिं पुरुषसन्ततेः ॥१३॥

If the lord of 5th house, Jupiter, Sun and Mars are in odd houses, they bless the native with children and perpetuate the lineage.

समराश्यंशगाः पुत्रनाथशुक्रसुधांशवः ।
अपत्ययोगिनां कुर्युर्वृद्धिं दुहितृसन्ततेः ॥१४॥

The lord of the fifth house, Venus and the Moon staying in the even house. improve the daughters, number to men.

पुत्रभावस्य षष्ट्यंशान्भुक्तान्हत्वा ग्रहेक्षणैः ।
नखैर्हृते तु यच्छेषं तत्संख्या समसन्ततिः ॥१५॥

Taking into consideration the sixtieth parts part in the fifth minimising the number of the sights of the planets divided by seven gives the equal number of females and male children.

तुल्यां पुत्रेशभुक्तांशैः संख्यया सन्ततिं परे ।
पुमीशैः पुरुषास्तेषु स्त्रीशैः कन्याश्च संमताः ॥१६॥

Some say that the number of childern should be equal to the Amsa part in that house, as per the male planets, the male children ar calculated and the female children by the female planets.

पुंसन्ततिनिमित्तानामोजथांशस्थितिर्वरा ।
स्त्रीसंततिनिमित्तानां युग्मभांशस्थितिस्था ॥१७॥

The cause of male children is the number of the planets in 'oja' house and the cause for female children is the number of planets in even houses.

विपरीतस्थितास्ते तु तत्तत्सन्ततिमृत्युदाः ।
अंशाधिपानां वीर्यं च चिन्त्यमत्र मनीषिभिः ॥१८॥

The stay of planets in the (reverse) antiplaces makes the children die. In this aspect the strength of the lords of Amsa also should be considered.

वक्री तुङ्गस्थितो वाऽसावेक एव भवेत्त्रिदः ।
स्वर्क्षमित्रर्क्षसंस्थश्चेदेक एव भवेद्द्विदः ॥१९॥

Among those planets, if one is having regressive motion and

in Uccha, he gives three children and if it is in its own house or in his friends house it gives two children.

मूढो नीचस्थितो वापि शत्रुक्षेत्रगतोऽपि वा ।
नदद्यादपि दत्वा वा क्षेमं कुर्तुं न पारयेत् ॥२०॥

If the planet sets or is in neecha or in the enemies house, it does not give children. Though it gives it cannot give safety.

गुरोरष्टकवर्गे तु पुत्रर्क्षे शुक्लबिन्दुभिः ।
ग्रहाणां बलयुक्तानां तुल्यसंख्या उतात्मजाः ॥२१॥

The number of children is equal to the number of the points in Astaka Varga, if we deduct those in the fifth house according to the strength of those planets.

तेषां तु स्त्रीत्वपुंस्त्वाभ्यां स्त्रियः पुंसोऽत्र निर्दिशेत् ।
बली पुत्रेशगुर्वोर्यस्तस्य रश्मीनुतानयेत् ॥२२॥

Among these, according to the strength of the male and female planets, the male and female children are decided between the lord of 5th house and Jupiter whoever is strong according to his Rasmis the number of children is decided.

दश भानोर्नवेन्दोः स्युः पंच भौमार्कभूविदाम् ।
गुरोः सप्तसितस्याष्टौ शास्त्रेत्र ध्रुवरश्मयः ॥२३॥

Ten for the Sun, 9th for Moon 5 to Mars, 5 to Saturn 7 to Jupiter 8 for Venus are the fixed Rasmis to these planets permanently.

ग्रहं स्वनीचे संशोध्य षड्नं चेद्यथास्थितम् ।
चक्रान्निर्गलितं कृत्वा यदि षड्भाधिकं भवेत् ॥२४॥

If a planet is below six or in six houses it should be kept as it is, if it is more than six it should be deducted from 12,

ध्रुवरश्मिहतं कृत्वा षड्भिस्तं विभजेत्पुनः ।
लब्धास्तु रश्मयो ज्ञेयाः सन्ततिस्तत्समा भवेत् ॥२५॥

The product must be divided by Rasmis and divided by six, the number of Rasmis obtained by this process is the number of children.

रश्मयस्त्रिगुणा ज्ञेयास्तुंगस्थे वक्रिणि ग्रहे ।
मित्रस्वांशगते खेटे द्विगुणाः परिकीर्तिताः ॥२६॥

The Rasmis should be Trippled if the planet is in Vakra or in Uccha and the Rasmis should be doubled if the planet is in its friend's or in its own house.

नीचारिक्षेत्रमौढ्येषुन्यूनाः कार्या यथोचितम् ।
एकांशयुक्ते सूर्येण न कश्चिच्छिष्यते करः ॥२७॥

If they are in neecha or in enemies house the strength of Rasmis is diminished according to its strength.

प्रोक्तास्वात्मजसंख्यासु ग्राह्या या भूयसी भवेत् ।
बलवत्यात्मजाधीशे दुर्बले तु कनीयसी ॥२८॥

The bigger number should be taken as the the number of children, if the planets are strong and the smaller number should be taken if it is weak.

पुत्रभावे पापयुते शुक्रे सप्तमभावगे ।
चतुर्थे चंद्रसंयुक्ते पुत्राभावं विनिर्दिशेत् ॥२९॥

If bad planets are in the fifth houses and there is Venus in

the 7th house and there Is moon in the fourth house, it is to be told that the native will have no issue.

तनुभावे पुत्रभावे रन्ध्रे व्ययगृहे यथा ।
यदि पापग्रहाः सर्वे पुत्राभावं विनिर्दिशेत् ॥३०॥

If in 5, 8, 12th houses there are bad planets th childlessness should be spoken of.

ततुभावे पापयुते तनुपे पुत्रभावगे ।
चतुर्थं चंद्रसंयुक्ते पुत्राभावं विनिर्दिशेत् ॥३१॥

If the bad planets are in Lagna and the lord of lagna is in the 5th house, and Moon is in 4th house chidless-ness is indicated.

क्षीणेंदुः पचमे पापाः सप्तमव्ययलग्नगाः ।
यस्य सोऽयमपुत्रः स्यादभार्यश्च न संशयः ॥३२॥

The weak Moon in the 5th house and the bad planets are in 7th, 12th and 1, the native does not have children and wife.

मंदभस्थे पापयुते मूढे जीवे त्रिकोणगे ।
लग्ने क्षीणेंदुसंयुक्ते पुत्राभावं विनिर्दिशेत् ॥३३॥

If the Jupiter is in 1, 5, 9 houses having Mudha (Setting) or with the combination of evil planets or is in the Saturns house and the weak Moon is in the Lagna not having children is indicated.

लग्ने चतुर्थे पुत्रेवा बुधे पापसमन्विते ।
त्रिकोणसंस्थितैः पापैः पुत्राभावं विनिर्दिशेत् ॥३४॥

If in Lagna, fourth and fifth there is Mercury with the combination of the bad planets and the stay of bad planets in trikonas, the native does not have children.

पुत्रेशः पुत्रभावस्य समीपे लग्नपस्य वा ।
यद्यादौ पुत्रजन्म स्याद्यौवनेऽन्त्येऽन्यथाऽऽयुषि ॥३५॥

If the lord of the 5th house is near to that house or of the lord of Lagna, the early children are indicated, and if they are distant begetting of children get.

जीवलग्नेशपुत्रेशास्तद्द्वयाप्तांशभेश्वराः ।
पुत्रगः पुत्रभप्रेक्षी तथा जायाधिनायकः ॥३६॥

एतेषां तु दशाकाले भुक्तिकालेऽथ वा पुनः ।
नराणां सन्ततिप्राप्तिरिति केरलनिर्णयः ॥३७॥

It is told in kerale that the lord of the Amsa house and of 5th house are in the 5th house or those who see the fifth house or the lord of the 7th house are among these during their periods or sub-periods, the people have issue.

पुत्रभे तत्पतिस्थाने तयोः सप्तमभेऽपि वा ।
तयोः कोणेऽथ वा जीवविलग्नतनयेश्वरौ ॥३८॥

संचरेयुर्यदा काले तदा सन्ततिरिष्यते ।
यदा वा संयुतास्तेस्युस्तदा वा सन्ततिर्भवेत् ॥३९॥

If the Jupiter moves in the fifth house or in the house where the lord of the 5th house stays or in the 7th house or in the

konas of these two or the lords of Lagna and of the Suns, move during that period, the birth children is indicated whenever their movement happens.

"इति श्री भगवन्महर्षिरमणांतेवासिनो
वासिष्ठस्य नरसिंह सूनोः गणपतेः कृतिः"
षोडषश्लोकी-होरानिर्णयसंग्रह-त्रिभावफलचंद्रिका च समाप्ता

॥ श्री ॥

श्रीवासिष्ठगणपतिमुनि विरचिता

महाविद्यादि सूत्रग्रन्थावलिः

॥ प्रथमो भागः ॥

॥ महाविद्यासूत्रम् ॥

१. कालीपटलः

२. तारापटलः

३. सुन्दरीपटलः

४. भुवनेश्वरीपटलः

५. भैरवीपटलः

६. प्रचण्डचण्डिकापटलः

७. धूमावतीपटलः

८. बगलामुखीपटलः

९. मातङ्गीपटलः

१०. कमलात्मिकापटलः

॥ श्रीः ॥

॥ महाविद्यासूत्रम् ॥

॥ प्रथमः कालीपटलः ॥

१. कालीं व्याख्यास्यामः ।
२. आद्या सा दशसु महाविद्यासु ।
३. क्रियाशक्तिः काली मध्यमा त्वधिदैवतम् ।
४. सर्वव्यापिनी ।
५. विद्युच्छक्तेर्नातिरिच्यते ।
६. सर्वाणि भूतानि पचत्यजस्रमेषा ।
७. पाक एव शास्त्रेषु व्यवह्रियमाणः परिणामः ।
८ पाचकत्वमेव कालस्य स्वरूपम् ।
९. काल एव स्त्रीलिङ्गेन काल्युच्यते ।
१०. अभूदनया बहूनामण्डाना संहारः ।
११. तस्याः कण्ठेऽस्माभिश्चिन्त्यमाना मुण्डमाला तदेतदण्डसंहारवैभवं स्मारयितुम् ।
१२. नित्यसङ्ग्रामकारिणीति पिशाचिकेव भीमरूपा वर्ण्यत इयं परिणमयित्री शक्तिः ।
१६. अत एव वामैव विभुतेत्याह पुष्पदन्तः ।
१४. महाकालस्य नित्यताण्डवस्य विभुतातः काली नातिरिच्यते ।
१५. क्रियैव ताण्डवमुच्यते ।
१६. परिणमयित्री शक्तिर्न केवलं संहरति ।
१७. सृजत्यपि ।
१८. पूर्वपूर्वावस्थासंहार एवोत्तरोत्तारावस्थासर्गो भूतानाम् ।
१९. एकैव क्रिया द्व्यर्थकरीत्युक्तं भवति ।
२०. एतेन कालस्य कारणत्वं व्याख्यातम् ।
२१. अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वेति मन्त्रवर्णोऽत्र भवति ।

२२. ईशस्य परमकारणत्वं तद्वत्वात् ।
२३. एषा परिणमयित्री समष्टिशक्तिर्भूतान्याविश्य व्यष्टिशक्तिश्च भवति ।
२४. तत्र तारतम्यमुपाधिभेदात्तेजस इव सूर्यावौ ।
२५. भूतान्तरापेक्षया चेतनानां तच्छक्तिवाही स्वभावो भूयान् ।
२६. अस्मासु प्रवहन्ती सा शक्तिः कुण्डलिन्युच्यते ।
२७. सा हि श्रेष्ठं प्राणमाविश्य क्रियाशक्तिर्भवति पुरः ।
२८. श्रेष्ठे शक्तौ च प्राणव्यवहारः उपनिषत्सु दृश्यते ।
२९. इन्द्रियसहपाठे श्रेष्ठपरः ।
३०. परत्वेन स्तुतौ शक्तिपरः ।
३१. प्राणतरङ्गा एवोच्छ्वासादयो न प्राणस्वरूपम् ।
३२. न वायुक्रिये पृथगुपदेशादिति बादरायणस्य सूत्रमत्र भवति ।
३३. संसारिणां प्राणशक्तिः प्रतिक्षणं विनियोगवैषम्येण क्षीयते ।
३४. मुहुर्मुहुः श्वासविसर्गाच्च ।
३५. आत्मशक्तेर्वृद्धये कालीमुपासीत ।
३६. रसज्ञया ।
३७. ज्ञानतः श्वसनं तस्याः शुद्धमुपासनम् ।
३८. ज्ञायमाना क्रिया महामहिमा स्यात् ।
३९. मनसे शक्तिं दद्यात् ।
४०. वाचे शक्तिं दद्यात् ।
४१. चक्षुषे शक्तिं दद्यात् ।
४२. अन्ततो दीर्घजीवितं च दद्यात् ।
४३. मुक्तये चैषा विद्या भवति ।
४४. इयं संवर्गविद्योपनिषत्सु गीयते ।
४५. प्राणविद्या कैश्चित् ।
४६. मुख्यप्राणोद्गीथविद्या परैः ।
४७. संसारिणः प्रहरत्खड्गं काली ।
४८. योगिनां हस्तगतं खड्गम् ।

॥ कालीपटलः समाप्तः ॥

———

॥ द्वितीयः तारापटलः ॥

१. तारां व्याख्यास्यामः ।
२. द्वितीया सा दशसु महाविद्यासु ।
३. शब्दशक्तिस्तारा मध्यमा त्वधि दैवतम् ।
४. शब्दशक्तिश्च प्रणवान्नातिरिच्यते ।
५. तां पश्यन्तीमाहुः ।
६. तार इति प्रणवस्य प्रसिद्धं नाम ।
७. तार एव स्त्रीलिङ्गेन तारोच्यते ।
८. इयं नाकाशस्य ।
९. अपि त्वाकाशे चरति ।
१०. ओंकारस्तु तदनुकरणमात्रम् ।
११. न स्वरूपम् ।
१२. खण्डत्वात् ।
१३. प्रणवो ह्यखण्डः ।
१४. तारैव नीलोच्यते तामसीति ।
१५. तामसत्वं चात्राव्यक्तत्वम् ।
१६. एतेन रुद्रस्य तामसत्वं च व्याख्यातम् ।
१७. पावनेभ्यश्च पावनी भवत्येषा ।
१८. यदियमीश्वरस्यासाधारणं नाम ।
१९. तस्य वाचकः प्रणव इति पतञ्जलिरत्र भवति ।
२०. तदनभिज्ञस्य सर्वे मन्त्रा व्यर्थाः ।
२१. ऋचो अक्षरे परमे व्योमन्निति मन्त्रे यस्तन्न वेद किमृचा करिष्यतीति पादोऽत्र भवति ।
२२. इयं व्यक्तशब्दानाविश्य व्यष्टिशक्तिश्च भवति ।
२३. प्रणवबाहित्वे शब्देषु तारतम्यम् ।
२४. ध्वनिभ्यो वर्णेष्वधिकत्वम् ।
२५. तत्रापि वैदिकपदघटितेषु ।
२६. तदनुगतसुरवश्रेणीसमर्पितनादविशेषतः प्रणवाभिव्यक्तिः ।
२७. एतेन मन्त्रस्वररक्षाप्रयोजनं व्याख्यातम् ।

२८. मन्त्राणां भाषान्तरीकरणे गूढार्थसमर्पणमेव प्रयोजनम् ।

२९. न जपोपयोगित्वम् ।

३०. अस्फुटप्रणवत्वात् ।

३१. ऋषीणां तपसि प्रणवसमुद्राभिर्गतास्तरङ्गा मन्त्राः ।

३२. तत्रर्षीणां वाग्जलस्य कुल्येव प्रवहणभूः ।

३३. पुरुषयत्नग्रथिता लौकिकाः शब्दाः ।

३४. सत्यामपि स्फुटप्रणवशब्दग्रथने नास्ति पुरुषस्य शक्तिः ।

३५. यथा सत्यामपि भूतसामग्र्यां शिल्पिनो न प्राणिनिर्माणशक्तिः ।

३६. अधिभूतमध्यात्मं च वागेव तारा ।

३७. सत्या समष्टिवाक् ।

३८. व्याख्यातं नीलात्वं तस्याः ।

३९. सैव ऋषिवाक्कुल्याद्वारा व्यक्ता त्रयी ।

४०. तां शुक्लामाहुः ।

४१. इत्यधिभूतम् ।

४२. अथाध्यात्मम् ।

४३. सत्यासत्या लौकिकी वाक् चित्रा ।

४४. महज्जिगमिषुणा तिसृष्वेकोपास्या ।

४५. तारायां एव शुक्लाचित्रोपासनमिति ।

४६. तारायां हीमे विभूती ।

४७. प्रणवमायास्त्रीकूर्चास्त्रैस्तारामुपासीत ।

४८. मायास्त्रीकूर्चास्त्रैर्वा ।

४९. मायास्त्रीकूर्चैर्वा ।

५०. शुद्धेन प्रणवेन वा ।

५१. उपासनं तु तस्या अन्तरव्यक्ते शब्दे स्थितिः ।

५२. मनसा मन्त्रानुसन्धानावव्यक्तशब्दनिष्ठा ।

५३. अनुज्ञामुद्रया वा ।

५४. इयमक्षरविद्योपनिषत्सु गीयते ।

५५. उद्गीथविद्या कैश्चित् ।

५६. नानृतं वक्तव्यम् ।

५७. सत्यमेव वक्तव्यम् ।

५८. स्वाध्यायोऽध्येतव्यः ।
५९. एतत्समासतः शुक्लाया उपासनम् ।
६०. चित्रोपास्या परमुखविहारिणी ।
६१. निन्दायां स्तुतौ च ।
६२. असम्बन्धप्रलापेषु काव्येषु च ।
६३. अपस्वरे सुस्वरे च ।
६४. रोदने गाने च ।
६५. तुल्यं नादं गृह्णीयात् ।
६६. न पराङ्मुखो भवेत् ।
६७. न चाभिमुखः ।
६८. एतच्चित्राया उपासनम् ।
६९. जिह्वारसस्य सरस्त्वोपकल्पनात्तत्सङ्ख्यायाः सरस्वतीति नाम ।

॥ तारापटलः समाप्तः ॥

॥ तृतीयः सुन्दरीपटलः ॥

१. सुन्दरीं व्याख्यास्यामः ।
२. तृतीया सा दशसु महाविद्यासु ।
३. सुन्दर्येव त्रिपुरसुन्दरी ।
४. ज्ञानशक्तिः सुन्दरी मध्यमा त्वधिदेवतम् ।
५. शब्दशक्तौ ज्ञानच्छायाश्लेषः ।
६. अतो ज्ञानशक्तिरिव सापि ।
७. तस्मान्नातिप्रसङ्गः ।
८. धर्मिणो ज्ञानस्य धर्मो ज्ञानमियमित्येके ।
९. दीपप्रभयोस्तेजस्त्वमिवोभयोर्ज्ञानत्वम् ।
१०. सुतरामभेद इत्यन्ये ।
११. अधिष्ठानत्वेन व्यवहारे तदेव धर्मी ।
१२. शक्तित्वेन धर्मः ।
१३. राहोः शिर इतिवद्वा भेदव्यवहारः ।

१४. अन्तरशाखाभेदेनेति वासिष्ठः ।

१५. अस्याः संविदोऽध्यात्मं प्रथमं पुरं चक्षुर्जागरितस्थानम् ।

१६. फालस्थेन्द्रधनुःप्रभेति नामनी अत्र भवतः ।

१७. द्वितीयं शिरस्तैजसस्थानम् ।

१८. विशुद्धचक्रमित्येके ।

१९. शङ्खिन्युभयसम्बद्धेति वासिष्ठः ।

२०. शिरस्थिता चन्द्रनिभेति नामनी अत्र भवतः ।

२१. तृतीयं हृदयं प्राज्ञस्थानम् ।

२२. हृदयस्था रविप्रख्येति नामनी अत्र भवतः ।

२३. उपनिषदि चायमावसस्थ इति त्रिरभ्यतं स्थानत्रयप्रदर्शनाय ।

२४. एवं संविदस्त्रिपुरात्वं व्याख्यातम् ।

२५. अथाधिदैवतम् ।

२६. सूर्यस्य मण्डलं प्रथमं पुरम् ।

२७. चन्द्रस्य द्वितीयम् ।

२८ अग्नेस्तृतीयम् ।

२९. द्वितीयं पुरं गगनमित्येके ।

३०. अध्यात्माधिदैवसाधारण्येन त्रीणि पुराणि परेषाम् ।

३१. तन्मते गगनं प्रथमं पुरम् ।

३२. सूर्यमण्डलं द्वितीयम् ।

३३. हृदयं तृतीयम् ।

३४. सर्वोत्कृष्टप्रकाशत्वात् सुन्दर्येषा ।

३५. तस्य भासा सर्वमिदं विभातीति श्रुतिरत्र भवति ।

३६. ज्ञानप्रदर्शनाय विषयज्ञाननिरूपणम् ।

३७. यथाग्निप्रदर्शनायाङ्गारनिरूपणम् ।

३८. महावाक्ये प्रज्ञानशब्दस्य विषयज्ञानं वाच्योऽर्थः ।

३९. शुद्धज्ञानं लक्ष्यः ।

४०. विषयोपरक्तं ज्ञानं विज्ञानम् ।

४१. निर्विषयं वस्तु ।

४२. क्रिया तटस्थं लक्षणं ब्रह्मणः ।

४३. ज्ञानं स्वरूपलक्षणम् ।

४४. मुमुक्षुः सुन्दरीमुपासीत ।
४५. सर्वज्ञत्वकामी वा ।
४६. वाक्कामशक्तिभिः ।
४७. ब्रह्मयोनिशान्तीन्द्रमायाभिः खभृगुब्रह्मखेन्द्रमायाभिर्भृगुब्रह्मेन्द्रमायाभिश्च वा।
४८. तामिसां श्रीविद्यामाहुः ।
४९. आसुर्येषा गायत्री ।
५०. तन्त्राणां सारः ।
५१ रमान्तया वा श्रीविद्यया ।
५२. प्रणवमाया श्रीपूर्वया श्रीमायाकामवाणीशक्तिसम्पुटितया श्रीविद्यया वा ।
५३. शुद्धमुपासनं ज्ञानमूलगवेषणम् ।
५४. प्रत्यग्गत्याऽहं स्फूर्तावतरणं वा ।
५५. इयं वैश्वानरविद्येत्युपनिषदि गीयते ।
५६. आत्मविद्यैव वैश्वानरविद्या ।
५७. आत्मा हि वैस्वानरः ।
५८. आत्मानं जानता गृह्यमाणा अपि विषया भेदेन नानुभूयन्ते ।

॥ सुन्दरीपटलः समाप्तः ॥

॥ चतुर्थः भुवनेश्वरी पटलः ॥

१. अथ भुवनेस्वरीं व्याख्यास्यामः ।
२. चतुर्थी सा दशसु महाविद्यासु ।
३. भुवनेस्वर्येव नामान्तरेण माया ।
४. ईक्षाशक्तिर्भुवनेस्वरी मध्यमा त्वधिदैवतम् ।
५. ज्ञानस्य निमित्तभूतः पूर्वो व्यापार ईक्षा ।
६: ईक्षाशक्तिरिच्छाशक्तिरित्यनर्थान्तरम् ।
७. क्वचिदीक्षापूर्विका सृष्टिः प्रदर्श्यते ।
८. क्वचिदिच्छापूर्विका ।

९. अविशेषादेव द्वयोः ।

१०. ईशस्येक्षैव विशालो देशः ।

११. प्रतिदर्शकयन्त्रे यावद्दृष्टिमतिविशालं पश्यामो देशम् ।

१२. स च देशो न यथार्थः ।

१३. अस्मद्दृष्टेर्नातिरिच्यते ।

१४. विमले जले पश्यामो महान्तमाकाशम् ।

१५. सह सूर्येण दिवा ।

१६. सह नक्षत्रैः सह चन्द्रमसा च निशि ।

१७. स च देशो न यथार्थः ।

१८. अस्मद्दृष्टेर्नातिरिच्यते ।

१९. स्वप्नदेशश्चैवम् ।

२०. यावती दृष्टिस्तावान् देशो भवति ।

२१. ईश्वरस्य दृष्टिरपारा ।

२२. तस्माद्विश्वस्य देशश्चापारः ।

२३. अपारश्च देशः परमाकाशान्नातिरिच्यते ।

२४. तस्माद्भुवनेश्वरी परमाकाशः ।

२५. विश्वस्मिन् परमाकाशो भित्तिस्थानीयः ।

२६. क्रियाशब्दविज्ञानानि चित्रस्थानीयानि ।

२७. तस्माद्भुवनेश्वर्यां पूर्वाः प्रतितिष्ठन्ति ।

२८. विश्वं प्रतितिष्ठतीत्युक्तं भवति ।

२९. ईक्षावत्यां मूलमिच्छा ।

३०. आद्या दृष्टिरिच्छेत्युक्तं भवति ।

३१. प्रतिदृष्टि श्चेच्छास्तीत्येके ।

३२. रसानुभूत्यौदासीन्याभ्या तद्भावाभावनिर्णयो लोके ।

३३. ईश्वरे च तथा स्यात् ।

३४. सर्वरसानुभूतिमानीश्वर इत्येकः पक्षः ।

३५. असङ्ग इत्यन्यः ।

३६. परमाकाश एवादितिरुच्यते ।

३७. अखण्डत्वात् ।

३८. ईश्वरः कश्यप उच्यते ।

३९. पश्यतीति ।

४०. अदितिःसर्वेषां देवानां माता ।

४१. कश्यपः पिता ।

४२ तन्नम्ना मुनिदम्पत्योर्व्यवहारः ।

४३. तौ न देवानां मातापितरौ ।

४४. अस्यामेव शक्त्यां सर्वं भुवनमोतंप्रोतं च ।

४५. आकाशे खलु गार्गीति श्रुतेः ।

४६. तथोपलब्धेश्च ।

४७. तस्माद्भुवनेश्वरीयमुच्यते ।

४८. भुवनमप्येषैव भवति ।

४९. प्रकृतित्वात् ।

५०. प्रकृतित्वं चास्या मूलदृष्टिरिति ।

५१. एवं जगतो दृष्टिसूलकत्वं व्याख्यातम् ।

५२ अस्मद्दृष्टिरेव सृष्टिरिति परे ।

५३. स्वप्नसृष्टिरेव सा ।

५४. अस्मच्छब्दस्य ब्रह्मपरत्वे तु न विप्रतिपत्तिः ।

५५. त्रयाणां व्यापकत्वे प्रमाणानि दृश्यन्ते ।

५६. अदितिर्जातमदितिर्जनित्वमिति देशस्य ।

५७. यमोह जातो यमोह जनित्वमिति कालस्य ।

५८. पुरुष एवेदं सर्वमिति पुरुषस्य ।

५९. देशव्यापकत्वं वैशाल्यमिव विश्वस्य ।

६०. दैर्घ्यमिव कालव्यापकत्वम् ।

६१. स्वरूपमिव पुरुषव्यापकत्वम् ।

६२. तस्मान्न विप्रतिषेधः ।

६३: भुवनेश्वरी परमा शान्ता ।

६४. सर्वाभ्यः क्रियाभ्य आत्मानं समर्प्य निश्चला तिष्ठति ।

६५. परमां शान्ति कामयमानो भुवनेश्वरीमुपासीत ।

६६. मायया ।

६७. प्रणवसम्पुटितया वा ।

६८. द्वितीयश्चिन्तामणिरुच्यते ।

६९. शुद्धमुपासनम् ।
७०. दृग्दृश्ययोरन्तरभूत आकाश एव सदा द्रष्टव्यः ।
७१. संसारिणां तु दृष्टेर्मार्ग एव नभः ।
७२. न लक्ष्यम् ।
७३. पृथिव्याद्युपासनं कष्टम् ।
७४. प्रियाप्रियोऽभयास्पदत्वात् ।
७५. यत्र द्वन्द्वोपरमस्तल्लक्ष्यमुत्तमम् ।
७६. तादृश आकाशः ।
७७. आकाशे न कस्य चिद्द्वेषः सङ्गो वा ।
७८. दर्शनादभ्रसदसीति श्लोकोऽत्र भवति ।
७९. अभ्रस्य सदस्त्वं ब्रह्माण्डसंकीर्णत्वात् ।
८०. सेयं हिरण्मयाण्डानां सभा द्यौः कनकसभोच्यते ।
८१. तत्रेशस्य ताण्डवं कालीपटले व्याख्यातम् ।
८२. दिवं पश्यन् साक्षिणि प्रतितिष्ठति ।
८३. दृष्टावेव हि तदा दृष्टिः ।
८४. इयं परोवरीयसी विद्योपनिषदि गीयते ।
८५. परोवरीयानुद्गीथ आकाशो हि ।
८६. तत्राकाशमीशमेके व्याचक्षते ।
८७. अभेदात्तदुपपद्यते ।
८८. दृष्टेर्वस्त्वेव हि लक्ष्यार्थः ।

॥ भुवनेश्वरीपटलः समाप्तः ॥

॥ पञ्चमः भैरवीपटलः ॥

१. भैरवीं व्याख्यास्यामः ।
२: पञ्चमी सा दशसु महाविद्यासु ।
३. भैरव्येव त्रिपुरभैरवी ।
४. परावाग्भैरवी ।
५. सुन्दर्यास्त्रिपुरात्वेन भैरव्यास्त्रिपुरात्वं व्याख्यातम् ।

६. सूक्ष्मशब्दज्ञानयोरभेदात् प्रायः ।
७. देवतैक्येऽपि तत्त्वविभूयिभेदाद्विद्या भेदः ।
८. मूलाधारे निष्ठाऽस्याः शुद्धमुपासनम् ।
९. स हि पराया आलयः
१०. अस्या अपि मन्त्रः श्रीविद्योच्यते ।
११. अत्र खभृग्वग्निवाग्भिर्युक्ताभिरादिबीजम् ।
१२. खभृगुकामाग्निभिः युक्तैर्द्वितीयम् ।
१३. खभृगुवह्निचतुर्दशसर्गैर्युक्तैस्तृतीयम् ।
१४. सुन्दर्यामिवात्रापि प्रथमं वाग्भवं कूटम् ।
१५. द्वितीयं कामराजं कूटम् ।
१६. तृतीयं शक्तिकूटम् ।
१७. अनया विद्यया भैरवीमुपासीत मोक्षकामः ।
१८. विद्याकामो वा ।
१९. जातवेदसस्त्रिष्टुभेमां कष्टतरणकामः ।
२०. अस्या एव देवगणतृप्तिदं स्वाहेति नाम ।
२१. स्वधेति च पितृगणतृप्तिदम् ।

॥ भैरवीपटलः समाप्तः ॥

॥ षष्ठः प्रचण्डचण्डिकापटलः ॥

१. प्रचण्डचण्डिकां व्याख्यास्यामः ।
२. षष्ठी सा शक्तिर्दशसु महाविद्यासु ।
३. प्रचण्डचण्डिकैव छिन्नमस्ता नामान्तरेण ।
४. काल्यास्तत्त्वेन प्रचण्डचण्डिकायास्तत्त्वं व्याख्यातम् ।
५. अस्ति कश्चन विशेषः ।
६. सामान्यतः परिणमयित्री विद्युच्छक्तिः काली ।
७. प्रभोरायुधभूता प्रचण्डचण्डिका ।
८. अत एव वज्रवैरोचनीयेति च कथ्यते ।
९. वज्रं ह्यायुधं प्रभोः ।

१०. विरोचनस्य शक्तिर्वैरोचनीया ।

११. विशेषेण रोचत इति प्रभुरेव विरोचनः ।

१२. वैरोचनी वा नामतः ।

१३. वैरोचनीं कर्मफलेषु जुष्टामिति मन्त्रोऽत्र भवति ।

१४. आधिदैवतं तु मध्यमा ।

१५. काली-सुन्दरी-भुवनेश्वरीणां देवता मध्यमा गौरीयं त्विन्द्राणीत्येके ।

१३. नामभेद एव न व्यक्तिभेद इति वासिष्ठः ।

१७. व्यक्तिभेदे वा वेषभेद एकस्याः ।

१८. मध्यमश्चेद्भिन्नवेषो मध्यमापि भिन्नवेषा ।

१९. अध्यात्ममपि काल्यास्तत्त्वेन प्रचण्डचण्डिकायास्तत्त्वं व्याख्यातम् ।

२०. अस्ति कश्चन विशेषः ।

२१. सामान्यतः प्राणमाविष्टा कुण्डलिनी काली ।

२२. योगिषु सुषुम्नया प्रवहन्ती पश्चात्प्रचण्डचण्डिका ।

२३. सुषुम्नायां च प्रचण्डचण्डिकाव्यवहारः ।

२४. सा योगिषु छिन्नमस्ता भवति ।

२५. छिन्नमस्तात्वं च कपालद्वयभेदात् ।

२६. न केवलं मरणे ।

२७. जीवितकालेऽपि ।

२८. भिन्नकपालोऽपि योगी जीवितुं शक्नुयात् ।

२९. व्यपोह्य शीर्षकपाले इति श्रुतिरत्र भवति ।

३०। देव्या एवं छिन्नमस्तात्वं व्याख्यातम् ।

३१. डाकिनीवर्णिन्यौ देव्याः सख्यौ ।

३२. इडैव डाकिनी ।

३३. पिङ्गलैव वर्णिनी ।

३४. छिन्नमस्तायाः सुषुम्नायाः स्वायत्तत्वात् मस्तकं करस्थितमिव स्यात् ।

३५. इदमेव ध्येयविग्रहे तत्करस्थस्य निजमस्तस्य तात्पर्यम् ।

३६. कबन्धादुद्गतं रक्तधारात्रिकं नाड्यग्रादुद्गतममृतधारात्रिकम् ।

३७. एकया शिरसस्तर्पणम् ।

३८. इतराभ्यामिडापिङ्गलयोः ।

३९. तद्द्वारा सर्वस्य देहस्य ।

४०. ध्येयविग्रहे रतिकामयोः पादाभ्यामवष्टम्भनेन कामजित्त्वं शक्ते-र्व्यज्यते ।

४१. सिद्धेषु भगवत्या अभिव्यक्तिः ।

४२. यः सिद्धानाराधयेत्स भगवतीं षष्ठीमाराधयति ।

४३. इत्यध्यात्मम् ।

४४. अथाधिलोकम् ।

४५. देवयानः पन्थाः प्रचण्डचण्डिका ।

४६. सा जुष्टा कर्मफलेषु ।

४७. दुर्गा नामान्तरेण ।

४८. दुर्गमा ह्यकृतात्मनाम् ।

४९. आदित्यमण्डलादस्मत्सुषुम्नापर्यन्तमस्ति कश्चन मार्गः ।

५०. स चासङ्ख्यशाखः ।

५१. रश्मयस्तेनायान्ति ।

५२. यावन्तः प्राणिनस्तावत्यः शाखास्तस्य पथः शरीर इह रश्मीनामागमनाय ।

५३. सुषुम्नाया एवैषा विभूतिः ।

५४. सुषुम्ना न केवलं शरीरमात्रनिष्ठा नाडी ।

५५. अपि त्वनेकाभिः शाखाभिः प्रपञ्चे स्थिता नाडी ।

५६. सा रश्मीनधो नयति ।

५७. ऊर्ध्वं च शुद्धान् प्राणान् मरणे ।

५८. एकैका शाखा तस्या असङ्ख्यसूक्ष्मरेणुमयी ।

५९. सोऽयं देवयानः पन्था अन्तरिक्षान्नातिरिच्यते ।

६०. अत एवान्तरिक्षं महद्व्रज उच्यते महर्षिभिः ।

६१. रेणुका तान्त्रिकैः ।

६२. परशुरामजननी रेणुका तु तदंशावतारः ।

६३. सा च छिन्नमस्तोच्यते छिन्नशीर्षत्वात् ।

६४. अस्माकं सुषुम्नामार्गे ग्रन्थित्रयमस्ति ।

६५. एको मूले ।

६६. स ब्रह्मग्रन्थिरुच्यते ।

६७. अपरो मणिपूरे ।

६८. स विष्णुग्रन्थिरुच्यते ।

६९. इतर आज्ञाचक्रे ।

७०. स रुद्रग्रन्थिरुच्यते ।

७१. तेन ग्रन्थित्रयेणास्मासु शक्तिरन्तरिक्षान्न बहुलमवतरति ।

७२. भिन्नग्रन्थौ तु बहुलं प्रवहति ।

७३. मार्गस्य निर्निरोधत्वात् ।

७४. सिद्धानां व्यष्टिनाडी समष्टिनाड्या मिलिता महामहिमा स्यान्त्

७५. क्रमेण ग्रन्थीनां मोक्षः ।

७६. रुद्रग्रन्थौ भिन्ने कैवल्यं हस्तस्थं स्यात् ।

७७. काश्यां तु मरणान्मुक्तिरिति श्लोकोऽत्र भवति ।

७८. इयमेव काशी यदाज्ञाचक्रम् ।

७९. अत्र मरणं च ग्रन्थिभेदः ।

८०. कपालभेदश्च प्रागुक्तो ग्रन्थिभेदसापेक्षः ।

८१. योऽन्तरिक्षान्महतीं शक्तिमिच्छति स प्रचण्डचण्डिकामुपासीत ।

८२. तन्मन्त्रे प्रणवः प्रथमं बीजम् ।

८३. श्रीर्द्वितीयम् ।

८४. माया तृतीयम् ।

८५. वाक् तुरीयम् ।

८६. सप्ताक्षरस्य तन्नाम्नः सम्बोधनं ततः ।

८७. ततः कूर्चद्वयम् ।

८८. अथास्त्रम् ।

८९. शिरोऽन्ते ।

९०. अनया विद्यया नास्ति किंचिदसाध्यम् ।

९१. कूर्चन्मन्त्रेण वा ।

९२. अथास्याः शुद्धमुपासनम् ।

९३. अन्तरूष्माणं विचिन्तयेत् ।

९४. अत्र विचिन्तने क्रोधमुद्रा भवति ।

९५. अन्वेषणमुद्रा वा ।

९६. दुःखमुद्रा वा ।

९७. लक्ष्यं मूलाधारे ।

९८. ज्योतिर्विद्योपनिषत्सु सेयं गीयते ।
९९. अन्तरिक्षादात्मनि प्रवहन्तीं शक्तिं वा ध्यायेत् ।
१००. अत्र शरीरसमर्पणमुद्रा ।
१०१. आदौ भावयेत् ।
१०२. कालेनानुभवति ।
१०३. अन्तरूष्मानुभवश्चात्मानुभवान्नातिरिच्यते ।
१०४. स्पर्शानुभव एषः ।
१०५. दर्शनानुभवोऽपरः ।

॥ प्रचण्डचण्डिकापटलः समाप्तः ॥

॥ सप्तमः धूमावतीपटलः ॥

१. धूमावतीं व्याख्यास्यामः ।
२. सप्तमी धूमावती दशसु महाविद्यासु ।
३. यया नात्मनोऽन्यद्व्यजानात् परमः सा योगनिद्रा प्रलयकालिकी धूमावती ।
४. सर्वकालानुबन्धिनीत्येके ।
५. मुक्तानां च नित्यानन्दनिद्रा ।
६. संसारिणां तु निद्रामूर्छाविस्मृतिश्च ।
७. अविद्या च यया संसारिणो नात्मानं जानते ।
८. अविद्या मायातो विलक्षणा ।
९. ययैकं बहुधा पश्यन्ति सा माया ।
१०. यया सन्तं न पश्यन्ति सात्वविद्या ।
११. देव्या निद्राभ्रान्तिरूपत्वं पौराणिके देवीसूक्त उक्तम् ।
१२. इयमेव रात्रिर्देवी वेदेऽभिधीयते ।
१३. ह्वयामि रात्रिं जगतो निवेशनीमिति मन्त्रवर्णोऽत्र भवति ।
१४. इयमेव देव्याद्यं तम उच्यते ।
१५. तम आसीत्तमसा गूह्लमग्र इति मन्त्रवर्णोऽत्र भवति ।
१६. तमोरूपत्वादियं धूमावती ।
१७. आद्यत्वाज्ज्येष्ठा ।

१८. अधिदैवतं वरुणानी ।
१९. विश्वोच्चाटनकामो धूमावतीमुपासीत ।
२०. द्विरनन्तधूमसहितेन शिरोऽन्तेन सम्बोधनेन ।
२१. शुद्धमुपासनं व्यतिरेकेणैव भवति ।
२२. नान्वयेन ।
२३. सर्वसङ्कल्पत्यागेनेत्युक्तं भवति ।
२४. तदेव महामौनम् ।
२५. सङ्कल्पेन पूर्णे किमपि नान्तरं कुर्यात् ।
२३. अन्तरकारिणो भयं श्रयते ।
२७. इयं भूमविद्येत्युपनिषदि गीयते ।
२८ तत्र हि ज्ञेयान्तरनिषेधः ।
२९. अत्रैव विद्याविद्ययोः समुच्चयः ।
३०. केवला त्वविद्या निषिद्धा निद्रादिः ।
३१. तदन्धंतमः ।
३२. केवला विद्या तु निषिद्धा विषयज्ञानात्मिका ।
३३. तद्भूयोऽन्धंतमः ।
३४. समुच्चयेन विद्याविद्ये उपास्ये ।
३५. विद्या च पूर्णा स्वतःसिद्धा ।
३६. अविद्या च विषयाणाम् ।
३७. विषयाऽविद्यया मृत्युं तीर्त्वा ।
३८. पूर्णविद्ययाऽमृतमश्नुते ।
३९. विषयाऽविद्ययैव पूर्णविद्या भासेत ।
४०. एवमविद्यापि विषयाणां चेन्मुक्तिदा भवति ।

॥ धूमावतीपटलः समाप्तः ॥

॥ अष्टमः बगलामुखीपटलः ॥

१. बगलामुखीं व्याख्यास्यामः ।
२. अष्टमी सा दशसु महाविद्यासु ।
३. स्तम्भनशक्तिर्बगलामुखी ।

४. अध्यात्मं सा शङ्खिन्यां नाड्याम् ।
५. अधिलोकं पितृयाने पथि ।
६. दण्डनाथा काचन मध्यमाया अधिदैवतम् ।
७. रिपुस्तम्भनकामो बगलामुखीमुपासीत ।
८. अन्तः शत्रुस्तम्भनकामो वा ।
९. खेन्द्राग्निशान्तिचन्द्रैः संयुक्तैः ।
१० शुद्धमुपासनमिन्द्रयोनिविद्यया ।
११. इन्द्रयोनिश्च जिह्वामूले लम्बमानं तैजसलिङ्गम् ।
१२. तल्लक्ष्यध्यानं तद्विद्या ।
१३. अन्तर्वायुसञ्चारनिरोधेन वा ।
१४. तं हठयोगमाहुः ।
१५. यो वायुं स्तम्भयेत् स सर्वं स्तम्भयेत् ।

॥ बगलामुखीपटलः समाप्तः ॥

॥ नवमः मातङ्गीपटलः ॥

१. मातङ्गीं व्याख्यास्यामः ।
२. नवमी सा दशसु महाविद्यासु ।
३. सामान्यतस्तारायास्तत्त्वेन मातङ्ग्यास्तत्त्वं व्याख्यातम् ।
४. अधिदैवतैक्येऽपि किंचित्तत्त्वभेदाद्विद्याभेदः ।
५. तत्राव्यक्तः शब्दस्तत्त्वम् ।
६. अत्र व्यक्तः ।
७. मन्त्रिणी मध्यमाया मातङ्ग्यधिदैवतमित्येके ।
८. भैरवी परावाक् ।
९. तारा पश्यन्ती ।
१० मातङ्गी वैखरी ।
११. ताभी रुद्रब्रह्मणस्पत्यग्नीनामल्पो भेदो व्याख्यातः ।
१२. मध्यमावाङ्मातङ्गीत्येके ।
१३. वैखरी मध्यमयोरेकं तत्त्वमित्यविप्रतिषेधः ।

१४. ब्रह्मणस्पतिर्बृहस्पतिरित्यनर्थान्तरम् ।
१५. तारायाः शुद्धोपासनेन मातङ्ग्याः शुद्धोपासनं व्याख्यातम् ।
१६. मन्त्रेऽस्ति विशेषः ।
१७. वाणीहृदयममरेश्वरः सविद्यो युक्तौ तालव्याद्यनन्तरस्पर्शौ युक्तौ मूर्धन्यादिस्पर्शोष्माणौ सशेषः कच्छपेशः शुण्डान्त्यं सविद्य इन्द्रः सशेषः सूर्यो हरिरनुनासिकपूर्वः सविद्यो गणपतिर्भृगुरग्निजले संयुक्ते जलंबकोऽनुनासिकपूर्वो ब्रह्मा सविद्योऽग्निः शिर इति तन्मन्त्रः ।
१८. तारोपासनफलेन तदुपासनफलं व्याख्यातम् ।

॥ मातङ्गीपटलः समाप्तः ॥

॥ दशमः कमलात्मिकापटलः ॥

१. कमलात्मिकां व्याख्यास्यामः ।
२. दशमी सा दशसु महाविद्यासु ।
३. कमलैव कमलात्मिका ।
४. सुन्दर्यास्तत्त्वेन कमलात्मिकायास्तत्त्वं व्याख्यातम् ।
५. सुन्दर्याः शुद्धोपासनेन कमलात्मिकायाः शुद्धोपासनं व्याख्यातम् ।
६. तत्त्वैक्येऽप्यधिदैवतभेदाद्विद्याभेदः ।
७. तत्र मध्यमस्य पत्नी देवता ।
८. अत्र तूत्तमस्य ।
९. अस्या अपि मन्त्रः श्रीविद्योच्यते ।
१०. प्रथमोष्माग्निशान्तिचन्द्रैः सहितैः स भवति ।
११. अनया कमलात्मिकामुपासीत मोक्षकामः ।
१२. वैभवकामो वा ।
१३. इति दश महाविद्यास्तन्त्रसारभूताः ।
१४. तदेतत् पादशतोनेनार्धसहस्रेण सूत्राणां महाविद्याविवरणं भवति ।

॥ कमलात्मिकापटलः समाप्तः ॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतिमुनेः कृतिः महाविद्यासूत्रं समाप्तम् ॥

२८. केषांचित् सवितुरिति षष्ठी धर्मिपरा ।
२९. भर्ग इति द्वितीया धर्मपरा ।
३०. तन्मते सविता ज्ञाता ।
३१. भर्गो ज्ञानशक्तिः ।
३२. केषांचिच्छरीरपरा षष्ठी ।
३३. शरीरिपरा द्वितीया ।
३४. तन्मते सविता हिरण्मयपुरुषाकृतिः ।
३५. भर्गस्तदन्तरभूतं वस्तु ।
३६. परेषां षष्ठीद्वितीययोरेकार्थत्वम् ।
३७. राहोः शिर इतिवत् ।
३८. चिदेव सोऽर्थः ।
३९. द्वितीयमर्थमृजुं मन्यते वासिष्ठः प्रकरणात् ।
४०. प्रथमं वा हिरण्मयपुरुषाकृति सम्बन्धात्यागेन ।
४१. मान्त्रवर्णिक उत्तरोऽर्धश्च आध्यात्मिकः ।
४२. अमुष्योद्देशेनास्य ध्यानमुपदिष्टं भवति ।
४३. धीमूलान्वेषणं ध्यानप्रकारः ।
४४. यथालक्षणं ध्येयत्वात् ।
४५. अत्रामुष्यदृष्टिरुत्कर्षात् ।
४६. आगमानां सार आसुरी गायत्री पञ्चदशाक्षरी मध्यमस्य ज्ञानशक्तिः ।
४७. निगमानां सार आर्षी गायत्री सावित्री ।
४८. इति सप्तचत्वारिंशता सूत्राणां गायत्रीव्याख्यानं भवति ।

॥ योगव्याख्यानम् ॥

१. योगं व्याख्यास्यामः ।
२. तप उपासनं योगश्चेति पर्यायाः ।
३. पदमिदं प्राधान्येन पतञ्जलिनोपयुक्तम् ।
४. योगश्चित्तवृत्तिनिरोध इति तस्य लक्षणं तेनोक्तम् ।
५. व्यतिरेकतस्तत् ।
६. अन्वयत आलोचनं योगस्य लक्षणम् ।
७. आलोचन एव चित्तवृत्तिनिरोधः ।

८. आलोचनं च तपः ।
९. तदेवोपासनम् ।
१०. आलोचने स्वात्मस्थितिरपि वृत्तिरिति चेन्मूलच्छेदः ।
११. पश्य विस्मृवस्तुनोऽन्तर्मार्गणे निजां स्थितिम् ।
१२. स योगस्तत्तपः ।
१३. मृगयमाणो लब्ध्वैव निवर्तते ।
१४. योगी त्वन्यस्य लब्धव्यस्याभावान्नित्यं मृगयत इव ।
१५. अनात्मजिज्ञासोरालोचनं मार्गणम् ।
१६. आत्मजिज्ञासोर्योगः ।
१७. पश्य दुःखे निजां स्थितिम् ।
१८. स योगस्तत्तपः ।
१९. दुःखितः शिष्टभोग्यजातसन्निकर्षात् पुनर्निवर्तते ।
२०. योगी तु जितभोग्यजातत्वान्न जातुचिन्निवर्तते ।
२१. सुषुम्नायाः संवित्सहस्रारपर्यन्तं प्रवहति ।
२२. तत्र मानसस्थानमासाद्याप्ततापा शीता भवति ।
२३. सा शीता सर्वनाडीद्वारा शरीरे प्रवहति ।
२४. संवित्प्रवाहमध्ये सेतुं बध्नीत स यथा मानसस्थानं न प्राप्नुयात् ।
२५. भ्रूमध्ये इत्येकः प्रकारः ।
२६. सेतुबन्धो नाम स्थापनं ध्यानेन ।
२७. तदा संविदः प्रभुत्वं पूर्णं स्यादविभक्तत्वादशीतत्वाच्च ।
२८. भ्रूमध्ये स्थापितायाः संविदोऽग्रमेव लक्ष्यं स्यात् ।
२९. कण्ठ इत्यपरः प्रकारः ।
३०. तत्र संविदो मध्यमेव लक्ष्यं स्यात् ।
३१. हृद इत्यन्यः प्रकारः ।
३२. तत्र संविदो मूलमेव लक्ष्यं स्यात् ।
३३. यः संविदोऽग्रे प्रतितिष्ठति स विश्वे पुरुषे प्रतितिष्ठति ।
३४. यः संविदो मध्ये प्रतितिष्ठति स तैजसे पुरुषे प्रतितिष्ठति ।
३५. यः संविदो मूले प्रतितिष्ठति स प्राज्ञे पुरुषे प्रतितिष्ठति ।
३६. देहेऽन्यत्र च प्रवहणाज्जडसंयोगेन विभक्तत्वेन च संविदः शक्तिः संसारिषु क्षीयते ।

३७. ततश्चात्मा परिभूयते बाह्यैः ।
३८. केवलायां नाड्यां विलसनाद्योगिषु सा विजृम्भते ।
३९. ततश्चात्मा न पराभूयते बाह्यैः ।
४०. मानसस्थानसंयोगात् संविच्छीतत्वेन न शक्तिमती संसारिषु ।
४१. तदभावेन शक्तिमती योगिषु ।
४२. ज्ञानायेन्द्रियसापेक्षत्वात् संसारिषु संविदल्पज्ञा ।
४३. स्वतन्त्रत्वाद्योगिषु दूरज्ञा ।
४४. इयं पुरोनाडीमवलम्ब्य योगस्य पद्धतिः ।
४५. प्रथममाकाशादेकांशक्तिमात्मशिरसि निपतन्तीं ध्यायेत् ।
४६. अनन्तरं शिरसो मूलाधारपर्यन्तं निपतन्तीम् ।
४७. इयं पश्चान्नाडीमवलम्ब्य योगस्य पद्धतिः ।
४८. इदं सप्तचत्वारिंशता सूत्राणां योगव्याख्यानं भवति ॥

॥ सीताव्याख्यानम् ॥

१. सीतां व्याख्यास्यामः ।
२. आदिकाव्यस्य या नायिका ।
३. सूर्यचन्द्रविद्युदग्निपुष्पपल्लवमणिहिरण्यादौ सर्वजननयनानन्दिनी कान्तिरस्ति सा श्रीरुच्यते देवी ।
४. सीता सर्वाङ्गेषु शोभनोत्तमोत्तमा नारी ।
५. तस्माच्छ्रियोंऽशः साधारणदृष्ट्यापि ।
६. सतामीश्वरार्पितो निष्कामकर्मराशिर्यज्ञ उच्यते ।
७. यज्ञश्च विष्णुर्यज्ञो वै विष्णुरिति श्रुतेः ।
८. यथा सकामव्यष्टिकर्ममयः पुरुषः संसारी तथा निष्कामसमष्टिकर्ममयोऽवतारः ।
९. दाशरथिं रामं सप्तममवतारमाहुः ।
१० सकामव्यष्टिकर्मणामेव फलानि वर्षशतभोग्यान्याहुः ।
११. किमुत समष्टिकर्मणः फलम् ।
१२. यज्ञमयस्यावतारस्य भोगाय किमपि स्रष्टव्यं स्यान्नियत्या ।
१३. सत एव सृष्टिर्नासतः ।

१४. अस्ति काचन देवता ।
१५. सा नियतिमाराधयितुं स्वयमप्यवतरति ।
१६. तामेव लक्ष्मीमाहुः ।
१७. रामस्यानुभूतये पर्याप्तं फलं सीता ।
१८. रूपे शीले वाचि च मधुरा ।
१९. अस्माकं तु चरिते मधुरा ।
२०. अयोनिजां सीतामाहुः पूर्वे ।
२१. अपविद्धां केचित् ।
२२. अत्रेयं चर्चा भवति ।
२३. अपां सूर्ये प्रथमाहुतिस्ततः सोमो जायते ।
२४. तस्य पर्जन्ये ततो वर्षम् ।
२५. तस्य पृथिव्यां ततोऽन्नम् ।
२६. तस्य पुरुषे ततो रेतः ।
२७. यस्य स्त्रियां ततः पुरुषः ।
२८. एवं पञ्चाहुतयो जन्मप्रयोजिकाः ।
२९. तस्मादयोनिजत्वमेव न सम्भवतीत्येकः पक्षः ।
३०. देवता मुक्तपुरुषो वा लोकानुग्रहाय भुवमवतरेत् ।
३१. तत्राहुति सङ्ख्याक्व चिदावृता स्यान्मातापित्रोरनुग्रहाय ।
३२. क्वचित्तृतीयस्यामेवाहुतौ शरीरधारणं माहाभाग्यात् ।
३३. अवतीर्णस्याहुतयो न पातपर्यायाः ।
३४. अपि त्ववतरणपर्यायाः ।
३५. अवतरतः पततो वा मार्ग एकः ।
३६. भौतिकरसो गुप्तस्वशक्तिर्जडप्रायः पतति ।
३७. व्यक्तस्वशक्तिश्चिज्ज्वलितोऽवतरति ।
३८. अवतीर्णस्य भूमण्डलं प्रतिपन्नस्य तृतीयस्यामाहुतावेवापि मनोबलेन कार्यार्थं शरीरं भवितुं शक्यमित्युक्तं भवति ।
३९. तस्मादयोनिजत्वं नासम्भवीत्यपरः पक्षः ।
४०. सीता पतिदेवतानां निदर्शनम् ।
४१. यतस्त्यागेऽपि भर्तरि निष्ठिता ।
४२. सीतायाः प्रभुत्वे भूतेष्वपि ददृशे ।

४३. हनूमच्छिवाशंसायामग्नौ ।
४४. आत्मनः प्रवेशे च ।
४५. अवकाशप्रार्थनासमये भुवि ।
४६. लङ्कावाससमये घोरेणोपवासेन तस्या अपारं योगवैभवं व्याख्यातं भवति ।
४७. पत्युरपि देवतेवाभूत् सा भगवती ।
४८. एतां हि विग्रहरूपां रामः सिषेवे त्यागेऽपि ।
४९. संकीर्त्या सीता पुण्यचरित्रा ।
५०. समुपास्या सीता कमलात्मिकाया अवतारः ।
५१. तदिदं पञ्चाशता सूत्राणां सीताव्याख्यानं भवति ।

॥ कृष्णव्याख्यानम् ॥

१. कृष्णं व्याख्यास्यामः ।
२. स विष्णोरष्टमोऽवतारः ।
३. उपनिषत्सु याज्ञवल्क्योद्दालकपिप्पलादप्रभृतय आचार्याः श्रूयन्ते ।
४. तेषां सर्वेषामप्येकोऽप्रतिमानं परमाचार्यो नः कृष्णः ।
५. गीतास्मृतेरयं ह्युपदेष्टा ।
६. गीताः खलूपनिषदां विवर्तः ।
७. असकृदावर्ती चन्द्रलोकात् प्रच्युतो वा पुरुषो भुवि जन्म प्राप्तः सर्वः संसारी ।
८. स स्वेनैवा कर्मणा प्रारब्धवान् भवति ।
९. अवतारस्तु लोकानुग्रहायावतीर्णो मुक्तपुरुषः ।
१०. देवो वा ।
११. तस्य सर्वेषु लोकेषु कामचारो भवतीति श्रुतेर्मुक्तस्य मानवलोकागमनमविरुद्धम् ।
१२. देवस्य च ।
१३. तस्य पृथग्जन्म संसारहेतुभूतं नास्ति कर्म ।
१४. तस्मात् कार्यार्थमवतीर्णस्य तस्य यज्ञेन प्रारब्धवत्त्वं स्यात् ।
१५. यज्ञश्चेश्वरार्पितः सतां कर्मराशिः ।

१६. क्रतुमयः पुरुष इति श्रुतिः ।
१७. यथा संसारी कर्ममयस्तथाऽवतारो यज्ञमयः ।
१८. यज्ञश्च क्रतुरेव ।
१९. विशेषस्तु व्यष्टिसमष्टिभेदात् ।
२०. यज्ञश्च विष्णुः ।
२१. अधियज्ञोऽहमेवास्मिन् देहे देहभृतां वरेति गीतावाक्यमत्र भवति ।
२२. अक्षरं कूटस्थं च पृथङ् निर्दिश्य कृष्णो यज्ञमात्मानमाह ।
२३. ज्ञापयति तेन यज्ञोऽवतारो न हिरण्यगर्भो न सूत्रात्मा न परं ब्रह्मवेति ।
२४. अस्मिन् देह इति सर्वसाधारणदेहान्वयेऽपि न विरोधः ।
२५. संसारिणोऽपि क्रतुमयत्वात् ।
२६. अधियज्ञशब्दस्य व्यष्टिवाचकत्वं संसारिपरत्वे ।
२७. समष्टिवाचकत्वमवतारपरत्वे ।
२८. एकत्र भक्तिः ।
२९. अन्यत्र योगः ।
३०. उभयत्रापि व्यवहारस्तुल्यः ।
३१. मुक्तपुरुषमिव क्वचिच्चन्द्रलोकादागतमपि यज्ञ आविशेत् ।
३२. नवमाहुतिक्रमतः सिद्धमपि क्वचित् ।
३३. क्वचिदुत्तमसङ्कल्पबलेन सिद्धम् ।
३४. नरनारायणयोर्मध्ये नारायणोनाम देवर्षिर्यदुकुलेऽवतीर्णस्तं यज्ञ-आविशत् ।
३५. स कृष्ण इति वासिष्ठस्य मतम् ।
३६. पुरुषोत्तम एव लीलया मानवलोके कृष्णशरीरं धृतवानित्येके ।
३७. तेषु द्वौ दलौ ।
३८. तेजोंऽशेनेत्येकः ।
३९. माययेत्यपरः ।
४०. मूलपुरुषादवतारो नितान्तं न्यूनः प्रथमदलमते ।
४१. मूलपुरुषसदृश एवावतारो द्वितीयदलमते ।
४२. अपि च विभुः ।
४३. ईश्वराविशेषत्वात् ।
४४. अपि च मायोपाधिकः ।

४५. ईश्वराविशेषत्वात् ।
४६. अपि च सर्वज्ञः ।
४७. ईश्वराविशेषत्वात् ।
४८. अपि च सर्वशक्तः ।
४९. ईश्वराविशेषत्वात् ।
५०. अणवोऽविद्योपाधिका अल्पज्ञा अल्पशक्तयश्च जीवाः ।
५१. कर्मभेदादवतारजीवभेदो वासिष्ठस्य मते ।
५२. सत्यप्येवं मतभेदे संसारिभ्योऽवतारो विशिष्ट इति सर्वसंमतम् ।
५३. तस्मादवतारः कीर्तनीय उपास्यश्च भवति ।
५४. कृष्णो जार इत्यापाततः कथावलोककानां भ्रान्तिः ।
५५. रासक्रीडावर्णने देवकीनन्दनं सत्यं कृष्णं मध्य एव गोपीनाम-सङ्गं गायन्ति ।
५६. गोपीभिः सहिताः कृष्णास्तु तन्मनः परिकल्पिताः ।
५७. मुख्यकृष्णमायाकल्पिता वा यथागोप्युद्देशम् ।
५८. कविकल्पिता वा भक्तानामीश्वरस्य च नायिकानायकभावेन हृदि स्थितेन ।
५९. अत्र भक्तानामेव गोपीत्वेन कल्पनम् ।
६०. भगवांश्च वदति वर्त एव च कर्मणीति ।
६१. कर्मचात्र सत्कर्म भवति ।
६२. जारः कथमात्मानं सत्कर्माणं वक्तुं शक्नुयात् ।
६३. गीताश्चेन्न प्रमाणं क्रीडाग्रन्थः कथं प्रमाणम् ।
६४. क्रीडाग्रन्थोऽन्यथा नेतुं शक्यते ।
६५. न गीतावचनम् ।
६६. तात्पर्यभङ्गापत्तेः ।
६७. कृष्णस्य परिग्रह एव षोडशसहस्रं नारीणां यदन्यत् ।
६८. परिग्रहबहुत्वेऽप्यसङ्गः कृष्णः ।
६९. अत एव तमस्खलितं ब्रह्मचारिणमाहुः ।
७० सुखदुःखयोः समचित्तः कृष्णः ।
७१. योगेश्वरत्वात् ।
७२. अत एवाद्भुतकारी ।
७३. कृष्णे कालीशक्तिर्जजृम्भे यथा प्राहुस्तान्त्रिकाः ।

७४. कालोऽस्मि लोकक्षयकृत् प्रवृद्ध इति गीतावचनं चात्र भवति ।
७५. इति चतुस्सप्ततया सूत्राणां कृष्णव्याख्यानं भवति ।

॥ रुद्रकुटुम्बसूत्रम् ॥

१. ज्योतिरिदमासीदवैकृतं व्यापकं चिद्रूपम् ।
२. तस्य सदिति ब्रह्मेत्यात्मेत्यन्यानि नामानि भवन्ति ।
३. तस्येयं प्रथमेक्षा यदात्मानं व्याप्तं प्राजानात् ।
४. सा द्यौः समपद्यत ।
५ अनन्तराणां विज्ञानानां भित्तिः ।
६. इमामेवानन्तं देशमाहुः ।
७. अदितिरखण्ड्यत्वात् ।
८. अथ ज्योतिर्दिवमभ्यतपत् ।
९. अव्यक्तशब्दरूपता तदा तस्य ।
१०. अव्यक्तशब्द एव प्रणवो नामान्तरेण ।
११. स दिवमभितपन् पुमानासीत् ।
१२. सर्गाय क्रियावत्त्वमत्र पुंस्त्वम् ।
१३. सर्गाय क्रिया च तपः ।
१४. स पुमान् रुद्रो नाम ।
१५. अभितप्यमाना द्यौर्योषासीत् ।
१६. सर्गक्षेत्रत्वमत्र योषात्वम् ।
१७. सा रुद्राणी नाम ।
१८. तौ दम्पती भवतः ।
१९. विश्वस्य मातापितरौ ।
२०. अत एव रुद्राण्यम्बिकोच्यते ।
२१. रुद्रस्त्र्यम्बको भुवनस्य पिता च ।
२२ तयोर्व्यक्तः शब्द आद्यः पुत्र आसीत् ।
२३. स एव ब्रह्मणस्पतिः ।
२४. गणपतिस्तान्त्रिकाणां भाषायाम् ।
२५. अयं च व्यक्तः शब्दः कर्णापिधानकालानुभूतकल्पो नित्य आकाशे ।

२६. रुद्रः सशब्दां दिवं पुनरभ्यतपत् ।
२७. वायुरजायत ।
२८. स द्वितीयः पुत्रः ।
२९. भैरवस्तान्त्रिकाणां भाषायाम् ।
३०. तं रुद्रोऽन्वभवत् ।
३१. स स्पर्शः ।
३२. तत्र द्यौः शरीरायते ।
३३. तरङ्गवशान्नानात्वव्यवहारश्च वायोः ।
३४. तदा वायवो रुद्रसूनवो मरुत उच्यन्ते ।
३५. रुद्रः सस्पर्शवायुशब्दां दिवं पुनरभ्यतपत् ।
३६. व्यक्तं तेजोऽजायत ।
३७. स तृतीयः पुत्रः ।
३८. सोऽग्निः ।
३९. गुहस्तान्त्रिकाणां भाषायाम् ।
४०. स एष रुद्रकुटुम्बस्तत्त्वतो व्याख्यातस्तत्त्वतो व्याख्यातः ।

॥ इन्द्रेश्वराभेदसूत्रम् ॥

१. इन्द्रः शिवश्च न द्वौ ।
२. इन्द्राणी रुद्राणी च न द्वे भवतः ।
३. इन्द्रेश्वरयोरेकार्थत्वादिन्द्रेश्वराभेदः ।
४. पुरां भिन्दुरिन्द्रः पुरभिदीश्वरो हि ।
५. देवराज इन्द्रो महादेव ईश्वरो हि ।
६. महेन्द्रमहेश्वरशब्दावपि हि तुल्यार्थौ ।
७. रुद्रसङ्क्रन्दनशब्दौ च ।
८. उग्रशब्दो ह्युभयत्र प्रयुज्यते ।
९. ईशानशब्दश्च ।
१०. भीमशब्दश्च ।
११. उभयोरप्यधिभूतं वैद्युततेजोरूपत्वात् ।
१२. मरुदीश एको भूतेशोऽपरो हि ।
१३. भूताश्च रुद्राः ।

१४. रुद्राश्च मरुद्वृधो नातिरिच्यन्ते ।

१५. उभावपि दुष्टसंहाराय हि प्रेर्येते ।

१६. उभयोरप्यपारः पराक्रमो वर्ण्यते हि ।

१७. मृत्युंजयत्वं च ।

१८. शिववाहनभूतो वृषो वर्षकत्वव्युत्पत्तेरिन्द्रवाहनभूतान्मेघान्नातिरिच्यते ।

१९. स वृष्ट्या सर्वानन्दकरत्वान्नन्दी ।

२०. सेचकत्वाद्वृक्षा ।

२१. जलात्मकत्वाद्गौः ।

२२. अत एव बहिर्नील इव दृश्यमानोऽपि श्वेतो वर्ण्यते ।

२३. आपोहि श्वेताः ।

आ. २४. एवं चेदिन्द्रेश्वरयोर्द्वेधा व्यवहारः कुत इति चेत् ।

स. २५. रुद्रो महान् प्राणः ।

२६. सोऽधिदैवतमिन्द्रः ।

२७. मध्यमस्याध्यात्मिकं नाम रुद्र इति ।

२८. आधिदैविकं नामेश्वर इति ।

२९. ततो रुद्राणी प्राणशक्तिरिन्द्राणी देवता स्त्रीरूपा चेत्युक्तं भवति ।

३०. रुद्र इन्द्रस्य तत्त्वम् ।

३१. इन्द्रो रुद्रस्याभिमानी ।

३२. रुद्राणीन्द्राण्यास्तत्त्वम् ।

३३. इन्द्राणी रुद्राण्या अभिमानिनी ।

३४. रुद्राणी रुद्रश्च योगिभिरुपास्येते ते ह्यध्यात्मचिन्तकाः ।

३५. इन्द्राणीन्द्रश्च वैदिकैः स्वाध्यायेन संस्तूयेते ते ह्यधिदैवतपरास्ते ह्यधिदैवतपराः ॥

॥ सृष्टिसूत्रम् ॥

१. एकः प्राणशरीर आत्माग्रे सुप्तेरुत्थित ऐक्षत ।

२. सा प्रथमेक्षाऽनन्तो देशः ।

३. प्रकृतिरेव न विकृतिः ।

४. शुद्धादाकाशान्नातिरिच्यते ।

५. अम्बिका विश्वजन्मक्षेत्रत्वात् ।
६. आप्रलयं निर्विरामानन्तरेक्षाधारा कालः ।
७. प्रकृतिरेव न विकृतिः ।
८. तपोध्यानाव्यतिरेकात् ।
९. मातरिश्वा प्राणनानन्यत्वात् ।
१०. ईक्षते ध्यायति प्राणितीति न पृथक्क्रियाः समष्टौ ।
११. व्यष्टौ च स्थितप्रज्ञदशायाम् ।
१२. अखण्डधारात्वान्न नाना ।
१३. कालपाकजं द्रव्यं तेजोगूढव्यापकविद्युद्रूपम् ।
१४. प्रकृतिश्च विकृतिश्च ।
१५. तेजः पाकजं द्रव्यमापो गूढव्यापकरसरूपाः ।
१६. प्रकृतिश्च विकृतिश्च ।
१७. अप्पाकजं द्रव्यमन्नं गूढव्यापकपृथिवीरूपम् ।
१८. प्रकृतिश्च विकृतिश्च ।
१९. एषा प्रथमा सृष्टिः ।
२०. अथ तेजोऽबन्नानां पाकवशादविभाज्यः संश्लेषः ।
२१. इयमेव त्रिगुणा प्रकृतिर्बादरायणस्य ।
२२. सर्वस्य दृश्यस्य मूलसामग्री ।
२३. आत्मा तदन्तरोऽभूत् ।
२४. तमिन्द्रमाहुः प्राञ्चः ।
२५. ईश्वरं नव्याः ।
२६. द्वितीया सृष्टिरेषा ।
२७. त्रिगुणायाः प्रकृतेः पाकवशादण्डानामुद्भवः ।
२८. आत्मा तेषामन्तरोऽभूत् ।
२९. ते देवा उच्यन्ते ।
३०. अण्डेषु पाकवशात् पिण्डानामुद्भवः ।
३१. आत्मा तेषामन्तरोऽभूत् ।
३२. ताः प्रजा उच्यन्ते ।
३३. इयं तृतीया व्यक्तजगत्सृष्टिर्व्यक्तजगत्सृष्टिः ।

———

॥ राजयोगसारसूत्रम् ॥

॥ प्रथमः खण्डः ॥

१. प्राणो गतिशक्तिमान् वायुः ।
२. एकत्र स्थित एव चलति तरङ्गः ।
३. उच्छ्वासनिःश्वासौ निभालयन् गतिशक्तिद्वारोपासीत वायुम् ।
४. ततस्तेजःशक्तिरुद्रिक्तास्यात् ।
५. प्राणस्तेजः शक्तिमानिन्द्रः ।
६. तेजःशक्तिरिन्द्राणी ।
७. नाडीष्वसाधारणमूष्मानुभवं निभालयन्निन्द्राणीद्वारोपासीतेन्द्रम् ।
८. ततः स्वरशक्तिरुद्रिक्ता स्यात् ।
९. प्राणः स्वरशक्तिमान् रुद्रः ।
१०. स्वरशक्तिर्गौरी ।
११. सूक्ष्मान्तरस्वरम् निभालयन् गौरीद्वारोपासीत रुद्रम् ।
१२. सूक्ष्मान्तरस्वर एव प्रणव उच्यते वेदान्तेषु ।
१३. स बहिश्च व्यापकः ।
१४. रुद्रोपासनेन क्षेत्रज्ञस्य चितिशक्तौ प्रतिष्ठां विन्देत् पाके समाप्ते ।
१५. स उत्तमः पुरुषार्थः
१६. तस्यां स्थितौ नित्यमप्रयत्नं तपः ।
१७. तपसः पाकाद्भवन्ति पूर्वदृढसङ्कल्पनानुरूपाः सिद्धयः ।
१८. अवतारपुरुषाणां कार्यानुरूपाः ।
१९. नित्यतपसः सिद्धयो न बन्धाय प्रमादासम्भवात् ।
२०. आद्यासु तिसृषु तपोभूमिषु ता इच्छतो देवतानुग्रहश्चेत् ।
२१. बन्धाय पुनरतपतः प्रमादसम्भवात् ।

॥ द्वितीयः खण्डः ॥

२२. व्यापकशक्तिपक्वानां भूतानां सूक्ष्मोरससारः प्राणः ।
२३. तस्य हृदयमायतनम् ।
२४. तस्यैव चित्ताख्या केषांचिद्भाषायाम् ।
२५. तदुपाधिरात्मा जीवः ।
२६. चितिशक्तौ निष्ठया परमेश्वरोऽनुभूयते सा हि परमेश्वरस्य प्राणोपाधेः ।

२७. गुणशक्तिकर्मद्वारैव हि वस्तूनामनुभूतिः ।
२८. प्राणश्चानुभूयते सा हि प्राणस्य परमेश्वरानुगृहीतस्य ।
२९. ईश्वरानुभूतिश्चाखण्डप्रकाशवित्तिः ।
३०. प्राणानुभूतिश्चाखण्डरसवित्तिः ।
३१. तदुभयमविभाज्यं लिङ्गं निष्ठायाः ।

॥ तृतीयः खण्डः ॥

३२. प्राणस्य प्राणापानव्यानोदानसमानाः पञ्च क्रियाविभूतयः ।
३३. प्राणस्योच्छ्वासनिःश्वासक्रियावती विभूतिः स्वशब्देनैव व्यवह्रियते ।
३४. विसर्जनक्रियावत्यपानः ।
३५. चलनक्रियावती व्यानः ।
३६. भाषणक्रियावत्युदानः ।
३७. पचनक्रियावती समानः ।
३८. मूलप्राणस्य शक्तिविशेषा एवैते न खण्डाः ।
३९. मूलप्राणस्य श्रेष्ठ इत्यपरं नाम ।
४०. तस्य प्रथमा विभूतिरुपासनेषु मुख्या ।

॥ चतुर्थः खण्डः ॥

४१. प्राणस्य क्रियाशक्तिः प्रत्युद्गच्छेत्तदेकं तपो यथोक्तम् ।
४२. उदानस्यान्यत् ।
४३. व्यानस्येतरत् ।
४४. भाषणक्रियायाः सकलक्रियाणां चोपासनाभ्यां तेनातिरिच्येते ।
४५. क्रियोपासनं च कुर्वतः क्रियायामेव दृष्टिः ।

॥ पञ्चमः खण्डः ॥

४६. मूलाधारादाशिर एका सूक्ष्मा नाडी ।
४७. सा सुषुम्ना ।
४८. शिरस आहृदयं सैव पुनर्लम्बते ।
४९. तस्या अमृताख्या ।
५०. एकस्या एव पश्चात् पुरश्च द्वौ मार्गावित्येके ।
५१. सुषुम्नायाः सव्यापसव्ययोरिडापिङ्गले नासापुटान्तगे ।
५२. तयोः सव्यापसव्ययोर्गान्धारीहस्तिजिह्वे नेत्रान्तगे ।

५३. अनयोः सव्यापसव्ययोः पूषालम्बुषे श्रोत्रान्तगे ।
५४. यदपि शिरो व्याप्य तत एव लम्बन्ते स्वावसानस्थानपर्यन्तम् ।
५५. ता एताः सप्त नाड्यः सप्त जिह्वा आधारवेदिगस्य तेजसः ।
५६. सप्त जिह्वा एव सप्तार्चिषः ।
५७. नाभि नाडीनां जन्मस्थानमेके ।
५८. देहमध्यकन्दस्य तावत्पर्यन्तव्याप्तेर्भक्तिः स व्यवहारः ।
५९. देहमध्यकन्दस्य मूलस्थं पर्वमूलाधारः ।
६०. मध्यस्थं स्वाधिष्ठानम् ।
६१. अग्रस्थं मणिपूरम् ।
६२: नाडीतन्तुजालवंशस्य कन्दादुपरि चतुर्थं पर्वानाहतं हृदि पञ्चात् ।
६३. पञ्चमं विशुद्धं कण्ठे ।
६४. षष्ठमाज्ञाख्यं शिरः कुहरे ।
६५. अग्रं सहस्रारम् ।
६६. अत्र वंशे सुषुम्नया प्रवहन्ती मूलाधारस्थतेजसः शक्तिः कुण्डलिनी ।
६७. तस्या ऊर्ध्वमुख्या आभिमुख्येनाधश्चिन्तनं ध्यानम् ।
६८. अत्र निमीलितनेत्रो गगनाच्छीर्षं प्रविशन्तीं शक्तिमदितो भावयेत् ।
६९. ततस्तां नाडीचक्रेऽवतरणक्रमेणामूलाधारम् ।
७०. अथाभ्यासबलात्तेजसि प्रतिष्ठां विन्देत् ।
७१. अनन्तरं स्वरचितिशक्तिनिष्ठा यथापूर्वम् ।

॥ षष्ठः खण्डः ॥

७२. अमृतया प्रवहन्ती बीजज्ञानशक्तिः ।
७३. तां शिरस्त आज्ञाचक्रमवतारयेत् ।
७४. ततो विशुद्धम् ।
७५. ततो हृदयस्य दक्षिणतः पुरो भांगस्थं दहरम् ।
७६. तत्र निष्ठा चितिशक्तौ निष्ठातो नातिरिच्यते ।
७७. सोऽयं तपसोऽन्यः प्रकारः ।

॥ सप्तमः खण्डः ॥

७८. अथातश्चतुर्विद्योऽन्यः प्रकारः ।
७९. दृष्टिं विषयेभ्यः समाहृत्य दृग्दृश्ययोरन्तराले स्थापयेत् ।
८०. सेयमाकाशोद्गीथविद्या ।

८१. अनन्तरं केवले द्रष्टरि प्रतिष्ठामभ्यसेत् ।
८२. कथं पश्यामीति तत्र प्रथमो विचारः ।
८३. कः पश्यतीति द्वितीयः ।
८४. एषोऽहं पश्यामीति निष्ठा ।
८५. अज्ञानिनो दर्शने विषयः प्राधान्येनावतिष्ठते ।
८६ द्रष्टा दर्शनं चाध्याह्रियते तस्याः प्रमितेर्वाच्यत्वे ।
८७. योगिनो दर्शने द्रष्टुः प्राधान्यम् ।
८८. विषयो दर्शनं चाध्याह्रियते तस्याः प्रमितेर्वाच्यत्वे ।
८९. दृष्टौ वा प्रतितिष्ठेत् ।
९०. तस्य दर्शने दर्शनमेव प्राधान्येनावतिष्ठते ।
९१. विषयो द्रष्टा चाध्याह्रियते तस्याः प्रमितेर्वाच्यत्वे ।
९२: द्रष्टरि दृष्टौ वा प्रतिष्ठितोऽनन्तरं कण्ठायावतरेत् ।
९३. तत्रेन्द्रयोनौ प्रतिष्ठां विन्देत् ।
९४. ततो हृदयायावतरेत् ।
९५. तत्र क्षेत्रज्ञेक्षेत्रज्ञस्य चितिशक्तौ वा प्रतिष्ठां विन्देत् ।
९६. तस्याः स्थितेः पुरुषार्थत्वं माहाभाग्यं च प्राग्वत् ।

॥ अष्टमः खण्डः ॥

९७. केवलो विचारोऽन्यः पन्थाः ।
९८. अहंस्फूर्तिमूलान्वेषणविधया ।
९९. अहंस्फूर्तौ प्रत्यग्गत्यावतरणेन वा ।
१००. विचारयन्नतारतं तज्जनोष्मणा हृदयस्य नाडीबन्धं शिथिलयेत् ।
१०१. तत्त्वज्ञानेनाभिमानबन्धम् ।
१०२ अत्र च निष्ठा पुरुषार्थमहाभाग्यानि प्राग्वत् ।

राजयोगसारसूत्रं समाप्तम्

इति श्रीभगवन्महर्षि रमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः कृतिरियं महाविद्यादिसूत्रग्रन्थावलिः समाप्ता ॥

॥ अनुबन्धः ॥

॥ अक्षरावलिः ॥

श्रीकण्ठानन्तसूक्ष्माख्यांस्त्रिमूर्तिममरेश्वरम् ।
अर्घीशं भारभूतिं चातिथीशं स्थाणुकं हरम् ॥ १
झिण्टीशं भौतिकं सद्योजातं चानुग्रहेश्वरम् ।
अक्रूरं च महासेनं स्वररुद्रान्नमाम्यहम् ॥ २
अन्यान् क्रोधीशचण्डेशपञ्चान्तकशिवोत्तमान् ॥
एकरुद्रं च कूर्मेशमेकनेत्रं चतुर्मुखम् ॥ ३
अजेशं सर्वसोमेशौ लाङ्गलीशं च दारुकम् ।
अर्धनारीश्वरं चोमाकान्तमाषाढिदण्डिनौ ॥ ४
अत्रि मीनेशमेषेशौ लोहितं शिखिनं तथा ।
छगलाण्डं द्विरण्डेशं महाकालं च वालिनम् ॥ ५
भुजङ्गेशपिनाकीशखड्गीशान् बकमर्जुनम् ।
भृगुं च नकुलीशानं शिवं संवर्तकं नुमः ॥ ६
केशवाद्यनिरुद्धान्ताः कीर्तिताः स्वरविष्णवः ।
चक्री गदायुधः शार्ङ्गी खड्गी शङ्खी हलायुधः ॥ ७
मुसलीशूलहस्तश्च पाशवानङ्कुशी तथा ।
मुकुन्दो नन्दजो नन्दो नरो नरकजिद्धरिः ॥ ८
कृष्णः सत्यः सात्त्वतश्च शौरिः शूरो जनार्दनः ।
भूधरो विश्वमूर्तिश्च वैकुण्ठः पुरुषोत्तमः ॥ ९
बलो बलानुजो बालो वृषघ्नवृषहंसकाः ।
वराहो विमलः पश्चान्नृसिंहो विष्णवो हलाम् ॥ १०
निवृत्तिस्च प्रतिष्ठा च विद्याशांतिरथेन्धिका ।
दीपिका देविका पश्चान्मोचिकानंतरं परा ॥ ११

सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायनी ततः ।
व्यापिनी व्योमरूपा चानन्ता स्युः स्वरशक्तयः ॥ १२

सृष्टिश्चर्द्धिः स्मृतिर्मेधा संज्ञा काञ्चनदेवता ।
द्युतिः स्थितिः स्थिरा सिद्धिर्जरा तदनुपालिनी ॥ १३

क्षान्तिर्महेश्वरी पश्चात् रतिस्तदनुकामिका ।
विशालाक्षी ह्लादिनी च प्रीतिस्तदनु नादिनी ॥ १४

तीक्ष्णा रौद्र्यभया निद्रा तन्द्राक्षुत्क्रोधिनी क्रिया ।
उत्कारी मृत्युसंज्ञा च पीता तदनुसङ्गतिः ॥ १५

अरुणा स्यामला वज्रा स्मृता व्यञ्जनशक्तयः ।
वर्णानामेवमीशानविष्णुशक्तिस्वरूपता ॥ १६

अत्र वर्णाः स्वरस्पर्शान्तस्स्थोष्माणस्ततः परम ।
ककारश्च क्षकारश्चेत्येकपञ्चाशदीरिताः ॥ १७

भूतान्यजगवी बालो बलो बाली वराहकः ।
सप्त वालिनमारभ्य धातवः सम्प्रकीर्तिताः ॥ १८

चन्द्रसूर्यौ समाख्यातावनुस्वारमकारकौ ।
गकारश्च टकारश्च गजाननषडाननौ ॥ १९

स्मृताः कलत्रवावर्णा ब्रह्मेन्द्रयमपाशिनः ।
कालः सकारः सम्प्रोक्तो हकारः प्राण उच्यते ॥ २०

एकार उच्यते योनिरीकारः कमलोच्यते ।
ककारस्तु पुनः काम इति तन्त्रविदो विदुः ॥ २१

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः
कृतिरक्षरावलिः समाप्ता ॥

———